COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No 1281

मुग्धबोधं व्याकरणम् ।



MUGDHABODHA VYAKARANA

BY

VOPADEVA

With the commentary of Rama Tarkavagisha.

EDITED WITH NOTES BY

SIVA NARAYAN SIROMANI

LATE PROFESSOR, SANSKRIT COLLEGE, CALCUTTA

AND

NITYA NATHA NYAYARATNA.

VOL. I. FASC I.

Calcutta.

PRINTED BY UPENDRANATHA CHAKRAVARTI, AT THE SANSKRIT PRESS

5, Nandakumar Chaudhury's 2nd Lane

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET

1911.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied,—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ... ... Rs.	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5	10
Aitareya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitareya Lochana	2	0
*Aṇu Bhāshya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/6	1	6
Ashtasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc. 1-5 @ /10/ each	1	4
Atmatattvaviveka, Fasc. 1 @ /10/ each	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-7 @ 1/ each	15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana Srauta Sūtra, Fasc. 1-3 Vol. II, Fasc. 1-3 @ /10/ each ...	3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	2
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10/ each ...	4	6
Baudhāyana Sūtra Sangraha	2	0
Bṛhaddevatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc. 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Çrī Chaitanya Charita, Fasc. 1-3	1	14
Çatadūshaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Çatasāhasrikā Prajñāpāramitā Part I, Fasc. 1-14 @ /10/ each	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18 Part II, Fasc. 1-10 Vol. IV, Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. 4, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Çlokavārtika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4; Vol 4, Fasc. 1 @ /10/ each	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	1	4
Gadādhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhilīya Gṛhya Sūtra, Vol I @ /10/ each	3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Gṛhya Sangraha		
Haralata		
Karmapradīpa, Fasc. I		
Kāla Viveka, Fasc. 1-7 @ /10/ each		
Kātantra, Fasc. 1-6 @ /12/ each		
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each		
*Kūrma Purāṇa, Fasc. 8-9 @ /10/ each		
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each ...		

मुग्धबोधं व्याकरणम् ।

मङ्गलाचरणम् ।

मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते ।
मुग्धबोधं व्याकरणं परोपकृतये मया ॥

ॐ नमो गणेशाय ।

* ब्रह्मादिदेवासुरवृन्दवन्दिते, पद्मालयेशाङ्घ्रिसरोजराजिते ।
कन्दर्पदर्पान्तकपादनीरजे सन्तु प्रणामा वरदोरुदव्रजे ॥
पञ्चाननं चन्द्रकलाविशुद्धं नादं दधानं प्रकृतिप्रयुक्तम् ।
व्यस्तं समस्तं स्वरितं सुसिद्धं चाष्टोदितं तं त्रिगुणं नमामि ॥
दनुजकुल-विपक्ष क्षुब्ध-दुग्धाब्धि-गर्भो-
ल्लसदमृत समाना रेजिरे यस्य वाचः ।
मुखर-खल खरोक्ति-ध्वान्त-विध्वंस-भानो
स्त्रिभुवन-बुध-वन्द्य.सेव पीयूषदृष्टेः ॥

---

* ब्रह्मेत्यादि श्लोकव्याख्या अन्याश्च कतिपयटीकाटिप्पन्यः परिशिष्टे द्रष्टव्याः ।

तेन व्याकरणं कृतं कलियुगे दृष्ट्वा भवाब्धौ नरा-
नज्ञानावृतमानसान् करुणया श्रीमुग्धबोधं भुवि ।
पाणिन्यादिमतावलोकनपरः श्रीरामशर्म्मा कृती
तस्यैतां सुधियां प्रमोदजननीं टीकां तनोति स्वयम् ॥
गुणवद्भिर्गुणो नेयो न दोषस्त्विह यत्नतः ।
सतां स्खलनजो दोषः परिष्कार्य्यः सतां पुनः ॥
परेऽत्र पाणिनीयज्ञाः केचित् कालापकोविदाः ।
एके विद्यानिवासाः स्युरन्ये सांक्षिप्तसारकाः ॥

इह खलु सकलशिष्टैकवाक्यतया प्रारिप्सितग्रन्थसमाप्ति-प्रतिबन्धकीभूतासाधारणदुरदृष्टनाशजनकेश्वरनमस्काररूपं मङ्गलं कुर्व्वन् शिष्यशिक्षायै आदौ श्लोकेन निबध्नाति मुकुन्दमित्यादि । ननु कथं नमस्काराद्भिमतसिद्धिः, मङ्गलसत्त्वे कादम्बर्य्यादावसमाप्तेः तदसत्त्वे शिशुपालवधादौ समाप्तेश्चेति । मैवं, इह विघ्नो माभूदिति कामनया शिष्टैः क्रियमाणस्य तस्याभिमतसमाप्ति-प्रतिबन्धकीभूतविघ्नाभावः फलम् । असमाप्तिस्तु कादम्बर्य्यादौ विघ्नस्य प्राचुर्य्यात् । नहि सहस्रजनसाध्यं कर्म्म शतेन साधयितुं शक्यते । शिशुपालवधादौ तु स्वभावसिद्धविघ्नाभावान्मङ्गलं विनैव समाप्तिः । अथवा तत्र नमस्कार एवासीत्, कायवाङ्मनोभिरेव तत्सम्भवात् । न चात्र प्रायश्चित्तवद्विघ्ननिश्चयेऽधिकार इति वाच्यं, तत्सन्देहेऽपि शिष्टाः प्रवर्त्तन्ते यत इति । अन्यथा अनुपस्थितारातिनृपतीनां रथ-करि-तुरग-पदाति-सेना-सेनापति-समादरणं न स्यादिति दिक् ।

सच्चिदानन्दं प्रणिपत्य मया व्याकरणं प्रणीयते इत्यन्वयः । संश्चासौ चिच्चासावानन्दश्चेति सच्चिदानन्दः । य-सः । असन् भावे शतृ, श्नसोरल्लोप इत्यादिना अकारलोपः, पश्चात् सौ नुम्, स्वान्तस्य लुपि, सन् सन्तः (१)। चिती संज्ञाने क्विपि चित्, विशिष्ट-ज्ञानम्। आङ्पूर्व्वे टुनदि समृद्धौ, घञ्, आनन्दः, अनवच्छिन्नप्रेमास्पदीभूतसुखमिति यावत् । तथाच "सत्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतेः । सच्चिदानन्दं किंविशिष्टं ? मुकुन्दं, मुक्तिं ददातीति डप्रत्यये मनीषादित्वान्मुक्तिशब्दस्य मुकुमादेशः । यद्यपि सच्चिदानन्दशब्देन ईश्वरएवोच्यते, तथापि मुमुक्षूणां यागयोगाद्यनुष्ठानद्वारा मुक्तिदातृत्वज्ञापनाय मुकुन्दमितिविशेषणीयम् । यद्वा श्रवणमनननिदिध्यासनादिसाध्यमुक्तेर्यो दाता भवति, स भक्ताभीष्टफलप्रदो भवतीति ज्ञापनाय । प्रणिपत्येति पत्लृ गत्यैश्वर्य्ययोः, क्वाच्, व्यादनञः क्वोयप् इति यप्, प्राग्वत्क्षौण इति नो णः । प्रधानप्रणयनक्रियायाः पूर्व्वकालीनत्वं प्रणिपातस्य संलक्ष्य तदुत्तरकालीनत्वं प्रणयनक्रियायाः संलक्ष्यते । अभिधानादेकवचनम् । यद्यपि निपूर्व्वपतधुर्नत्यर्थस्तथापि भक्तिश्रद्धातिशयपूर्व्वक-स्वापकर्षबोधकव्यापारविशेषज्ञापनाय प्रशब्द इति। व्याकरणमिति व्याङ्-पूर्व्वकृञधुर्व्युत्पादनार्थः, व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययपरिकल्पनया सिद्धशब्दा अनेनात्र वा, घे ङे वानटि णर्घूङिति णः, पश्चात् लिङ्गसंज्ञायां सेर्म। प्रणीयत इति प्रपूर्व्व-णीञ प्रापणे कृत्यर्थः, तस्मात् टे ते यक् च, क्वित्वात्र गुः, प्राग्वत्नो ण इति णः । नतु

(१) सिद्ध इति पाठान्तरम् ।

अन्यानि व्याकरणानि सन्ति, किमनेन इत्यत आह मुग्धबोधमिति। मुग्धः सुन्दरो बोधो यस्मात् तन्मुग्धबोधं, अन्यापेक्षया प्रकरणशुद्धा झटितिपदपदार्थज्ञानं यस्मात् इत्यर्थः। यद्वा मुग्धानां मूढ़ानां बोधो ज्ञानं यस्मात् तत्। तथाच सर्व्वेषां विशिष्टज्ञानजनकतया अत्युपादेयमिति। मुग्धः सुन्दरमूढ़योरिति धरणिः। बुध्यौ ज्ञ बोधे घञ्, णः। ननु ग्रन्थकृतां ज्ञानमस्त्येव, किमनेनेत्याह परोपकृतये इति। परेषामुपकृतिः परोपकृतिस्तस्यै परोपकृतये, उपकृतिरुपकारः। ग्रन्थकृतां प्रवृत्तिस्तु ईश्वरवत् फलानुसन्धानं विनैव। यद्वा पराचासावुपकृतिश्चेति परोपकृतिस्तस्यै, परा श्रेष्ठा, ततश्च स्वीयपरकीयोपकाराय। तथाच, रुणद्धि रोदसीं चास्य यावत् कीर्त्तिरनश्वरी। तावत् किलायमध्यास्ते सुकृती वैबुधं पदमितिस्मरणात् स्वीयोऽप्युपकारः। केचित्तु चिच्चासावानन्दश्चेति चिदानन्दः, पश्चात् संश्चासौ चिदानन्दश्चेति सच्चिदानन्दस्तमिति यगर्भ-यसं स्वीकुर्व्वन्ति, यस्य (कर्म्मधारयस्य) षत्वात् (तत्पुरुषत्वात्) द्विदयोरेवेति। तन्न, जिनेन्द्रबुद्धिपादाः—काला (१) इति सूत्रे द्वे अहनी जातस्य द्व्यह्नजात इति त्रिपदतत्पुरुषं स्वीकृतवन्तः। अतएव यसप्रकरणे ग्रन्थकृतोक्तं संश्चासौ चिच्चासावानन्दश्चेति सच्चिदानन्द इति। यद्वा चिच्च

---

(१) कालाः परिमाणिना (२।२।५)—परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते। द्वे अहनी जातस्य यस्य स द्व्यह्नजातः। यस्य हि जननाद्दूर्ध्वं दिनद्वयं गतं, स द्व्यह्नजात इति व्यवह्रियते इति पाणिनीये।

१ । ओं नमः शिवाय ।

(ओं । १ ।, नमः । १ । शिवाय ४ ।)

इति नमस्कारसूत्रम् ।

आनन्दश्च तौ चिदानन्दौ, सन्तौ चिदानन्दौ यस्मात् स तं । तथा च तत्त्वज्ञानं स्वर्गादिसुखञ्च यस्माद् भवतीति ।

१ । ओमिति । त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः । उद्देशो लक्षणं परीक्षा चेति । उद्देश उपदेशः, सदाशिव-परमात्म-स्वरूप-ब्रह्मण उपदेशः (१)। यतः, सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इति । सिद्धोऽभिधेयः, अर्थः प्रयोजनं, सिद्धश्च अर्थश्च तत्, सिद्धेन सह सम्बन्धः सिद्धसम्बन्धस्तम् । तत्र किं केन कथ(२)मिति जिज्ञासायां, किं प्रयोजनं ? शिवम् । यतः, प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते । तदुक्तं, सर्व्वस्यैव हि शास्त्रस्य कर्म्मणोवापि कस्यचित् । यावत् प्रयोजनं नोक्तं तावत् तत्केन गृह्यते इति । तथाच शिवाय शिव-प्रयोजनाय ओङ्कारप्रतिपाद्याय तस्मै परमात्मने नमः ।

सिद्धसम्बन्धप्रकारमाह ।

आत्मा बुद्ध्या समर्थ्यार्थान्नियुङ्क्ते तद्विवक्षया ।
मनस्तद्वह्निमाहन्ति स प्रेरयति मारुतम् ॥
वह्निमारुतसंयोगात् क्षोभाद् वागिन्द्रियस्य च ।
सूक्ष्मा वाग्जायते पूर्व्वं स एव कथितो ध्वनिः ॥

---

(१) नामकीर्त्तनमिति यावत्, ओमितिशब्दब्रह्मण इतिशेषः ।

(२) किं प्रयोजनम्, केन सह व्याकरणस्य किम्प्रकारः सम्बन्धः ।

तत्तत्स्थानेष्वथ यदा वायुश्चलति सेन्द्रियः ।
पश्यन्ती वर्णरूपा वाक् तत उत्पत्तिमर्हति ॥
मध्यमा पदरूपाथ वाक्यरूपाथ वैखरी ।
इति वाचामवस्थाः स्युर्मुखमध्ये तदिन्द्रियम् ॥
अर्थप्रत्ययोर्वाक्यात् श्रुतादनुमितान्मतात् ।
विशिष्टं खं मुखं राति विखरा सैव वैखरी ॥

जायते प्रादुर्भवति । तथाच भगवद्वाक्यम्—

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्निति ।

एतेन शंशब्दैरित्यादि-बहुलं ब्रह्मणीत्यन्त-दशाध्यायिरूप-व्याकरणस्य साध्यत्वं, शूद्राणामनधिकारित्वञ्च प्रत्युक्तमिति । अथ वर्णदेशना ।

हृत्कण्ठजिह्वं खलु तालु मूर्द्धा दन्तास्तथौष्ठावथ नासिका च ।
वर्णप्रकोष्टानधऊर्द्ध्वभेदानित्याह चाष्टावुपदेशतोऽन्यत् ॥

तथाचाहुः शिक्षाकाराः—

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठञ्च तालु च इति ॥

किं पुनः कस्य प्रयत्नः (१) ।

स्पृष्टत्वमीषत्स्पृष्टत्वं विवृतत्वं तथैव च ।
संवृतत्वं च वर्णानामन्तः प्रयत्न उच्यते ॥ इत्याहुः । (२)

---

(१) वर्णोच्चारणानुकूल आभ्यन्तरो व्यापारविशेषः ।

(२) स्पृष्टत्वं ईषत्स्पृष्टत्वं विवृतत्वं संवृतत्वञ्च वर्णानां अन्तःप्रयत्न आभ्यन्तरप्रयत्न उच्यते । एतेषामाभ्यन्तरत्वं वर्णोत्पत्तिप्रागभावित्वात्, तथाहि नाभि-

२। शं शब्दैः। (शं। १। शब्दैः ३॥।)।

शब्दैर्मङ्गलं स्यात्। इति प्रयोजनाभिधेयसम्बन्धाः।

इदमादिमङ्गलं, तथाचाह मनुः—

ओंकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा।

कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ इति।

अथ त्यादिरुच्यते इत्यत्राथशब्दः मध्यमङ्गलं, बहुलं ब्रह्मणीति ब्रह्मशब्दोऽन्तमङ्गलं शास्त्रस्याभ्युदयपरम्। तथाच, मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राण्यव्याहतप्रसराण्यायुष्मद्वाख्यातृकाणि भवन्तीति श्रुतेरिति। यद्वा अकारोकारमकारप्रतिपाद्याय ब्रह्मविष्णुशिवात्मकाय नमः, शिवाय कल्याणाय। एके तु उभयोरुपासकत्वात् उभयनमस्कारः, यद्वा सूत्रवृत्त्योर्निर्विघ्नसिद्धये इत्याहुः। ननु प्रकृतिप्रत्ययपरिकल्पनया साधुशब्दव्युत्पादनाय प्रतिज्ञायामनेन कः साधुशब्दो व्युत्पादित इति शङ्कां निरस्यन्नाह इतीति। इतिशब्दः प्रक्रान्तपरामर्शी। तथाहि ओं नमः शिवायेति नमस्कारसूत्रम्।

२। शं शब्दैः। किमर्थमेतयोरुपदेशः? सिद्धार्थं सिद्धसम्बन्धं

प्रदेशात् प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्द्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्याहन्ति, ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा उत्पत्तिः, तदुत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं तात्वादि सम्यक् स्पृशन्ति तदा स्पृष्टता, ईषत् यदा स्पृशन्ति तदा ईषत्स्पृष्टता, समीपावस्थानमात्रे संवृतता, दूरत्वे विवृतता। अतएव इचुयशानां तालव्यत्वाविशेषेऽपि तालुस्थानेन सह जिह्वाग्रादीनां चकारोच्चारणे कर्त्तव्ये सम्यक् स्पर्शः, यकारे ईषत् स्पर्शः, शकारेकारयोः समीपदूरावस्थितिरिति तत्त्वबोधिनी।

श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इति। तथा च सिद्धसाध्यसमभिव्याहारात् सिद्धः साध्यायोपयुज्यते इति हेतुत्वेन। ननु नित्यानां वर्णानां साध्यत्वमेव कुतः इति चेत् सत्यं, तेषां व्यञ्जकवायोर्जन्यत्वमादाय साध्यत्वव्यवहारो ननु वर्णानामिति। शब्दैः शमिति, शब्दैः परम्परया काव्यरचनादिद्वारा ऐहिकं, यागयोगाद्यनुष्ठानद्वारा पारलौकिकं स्वर्गमोक्षरूपं कल्याणञ्च भवतीत्यर्थः। इत्यादि, इतिशब्दः प्रक्रान्तपरामर्शी। शं शब्दैरिति वाक्येन प्रयोजनाभिधेयसम्बन्धाः, प्रयोजनं कल्याणम्, अभिधेया वक्ष्यमाणसाधुशब्दाः, सम्बन्धो जन्यजनकभावः, प्रदर्शिता इति शेषः। अथ साधुशब्दव्युत्पादनाय शास्त्रं करिष्यमाणः परामृशति। साध्वसाधुशब्दान् प्रत्येकमुल्लिख्य साध्वसाधुशब्दपरिज्ञानं युगसहस्रेणाप्यशक्यं, शब्दानामनन्तत्वात्। ततश्च बहुतरविशेषावच्छिन्नसंग्राहिकैका संज्ञा विधेया व्यवहारार्थम्। तथाच, संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् इत्युक्तम्। व्यवहारार्थं स्वशास्त्रे कृतःसङ्केतः संज्ञा,यथा अक् इक् इत्यादि। परितो व्याप्ता भाषा परिभाषा। सा द्विविधा न्यायमूला ज्ञापकसिद्धा च। यथा शिवेहीत्यादौ स्थानिवदादेश इति न्यायात् आदिष्टाङि अवर्णलोपः। राज्ञी इत्यत्र सदानोऽल्लोप इति नित्यमकारलोपः, आदीपोरित्यत्र निरनुबन्धस्य ग्रहणेन न सानुबन्धस्य ग्रहणमिति ज्ञापनात्। विधानं विधिरप्राप्तिप्रापकः, क्वचित् वर्णोत्पादनरूपः क्वचिदभावरूपः, तस्यैव भेदौ नाशनिषेधौ, क्वचिदादेशरूपश्च। यथा

स्याद्यन्ताधिकारः। सन्ध्यध्यायः।

अथ संज्ञा।

३। अ इ उ ऋ ऌ क, ए ओ ङ, ऐ औ च, ह य व र ल, ञ ण न ङ म, झ ढ ध घ भ, ज ड द ग ब, ख फ छ ठ थ, च ट त क प, श ष साद्यन्ताख्याः। (अ—म।१।।।, आद्यन्ताख्याः १।।।)।

एषां मध्ये ये वर्णास्ते आदिवर्णान्तवर्णसमाहारसंज्ञाः स्युः।

रामाणां, शिवायोन्नमः, स च अनन्तः, मुरारिरित्यादौ नुमादिविधिः। सामान्यप्राप्तकार्य्यस्य विशेषावधारणं नियमः, यथा सुवश्चा इत्यादौ षनियमः। अन्यधर्मस्य अन्यत्रारोपणमतिदेशः, यथा भव्यं भाव्यमित्यादौ अच्त्वातिदेशादवादयः। पूर्व्वसूत्रस्थितस्य दस्य परसूत्रोपस्थितिरधिकारः, यथा सह णें षें इत्यतः सहशब्दस्यादिशेचोरित्यादावनुवृत्तिः। उक्तयोः (१) कथं सूत्रत्वं—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदोविदुरिति (२) दर्शनात्।

३। अइ। अय इय उय ऋय ऌय ते अ इ उ ऋ ऌ लुप्तप्रोक्तं

---

(१) ओं नमः शिवाय साम्बैरित्यनयोः।

(२) अल्पाक्षरमिति—अल्पाक्षरं संक्षिप्तवर्णविन्यासमाध्यम्। असन्दिग्धं—इदमेतदन्यद्वेति बुद्धिभेदाजनकम्। सारवत् निष्कृष्टार्थयुक्तम्। विश्वतोमुखं बहुषु स्थलेषु प्रवृत्तम्। अस्तोभं निरर्थकशब्दवर्जितम्। अनवद्यं असौष्ठवादिदोषशून्यम्।

दं, तेभ्यः कमितं करोति, अ इ उ ऋ ऌ क ए ओ ङ इत्यत्र ककारं विना अ इ उ ऋ ऌणामनुवृत्त्या तेभ्यः ए ओ इत्येताभ्यां ङमितं करोति, एवं ङकारं विना अ इ उ ऋ ऌ ए ओ इत्येषामनुवृत्त्या तेभ्यः ऐ औ इत्येताभ्यां चमितं करोति, तथा चं विना हससूत्रे अनुवृत्तिरित्यर्थः (१)। चत्वारि दानि, अन्यथा एकदत्वे कङचां चावयवत्वे (२) हादिवदित्त्वं न स्यात्। एषामसन्धिर्न्नाजो अन्त इत्यादिना चादिपाठात् (३)। हश्च यश्च वश्च इत्यादिचसः। हादिसान्ता लुप्तग्रीव्वान्ताः। अन्तश्च अन्तश्च अन्तौ ताभ्यां सह आदिः आद्यन्तौ राजदन्तादित्वादादिशब्दस्य पूर्व्वनिपातः शाकपार्थिवादित्वाम्मध्यपदलोपः, आद्यन्तौ आख्या येषां ते आद्यन्ताख्याः (४)। एषां मध्य इति, एषां अकारादिसकारान्तानां मध्ये यान् वर्णानपेक्ष्य य आदि स्तेन सह यान् वर्णानपेक्ष्य योऽन्तस्वरूपो योऽवयवश्च स तेषां संज्ञेत्यर्थः (५)। अतएवोक्तं समाहार-

---

(१) इत्थं परपदे सर्व्वेषां पूर्व्ववर्णानां अनुवृत्तावपि ग्रन्थप्रयोगानुसारेण तत्तत्संज्ञा वेदितव्याः। तेन अक् इक् इत्यादिवत् उक् इत्यादीनामप्रयुक्तत्वादनादेयत्वमिति। अतएव "अक् इत्यादिसंज्ञा यथायोग्यप्रयोजनमुद्दिश्य योज्या" इति का-सि।

(२) द्वन्द्वसमासावयवत्वे सति।

(३) चादिर्गिर्निरिति वक्ष्यमाणसूत्रे चादिगणे अचां पाठादित्यर्थः।

(४) क्वचिदादिवर्णेन सह अन्तस्वरूपोऽन्तस्थितो यो वर्णस्तमादाय संज्ञा भवेत्। यथा अक् इत्यादयः। क्वचिच्च अन्तावयव-स्वरूपवर्णमादायेत्यर्थः। यथा रव् इत्यादयः।

(५) अन्तश्च अन्तश्च अन्तावित्येकशेषे एकेनान्तशब्देन कङचा इतो वर्णा द्वन्द्वसमासावयवीभूतवर्णा गृह्यन्ते इत्याशयः। "एषामिति अभेदसम्बन्धे

४ । इत् कृते । (इत् ।१।, कृते ।४।) ।
कस्मैचित् कार्य्यायोच्चार्य्यमाणो वर्णः इत्संज्ञः स्यात् । तस्य-कार्य्येऽनुच्चारः । यथा अचि कङचाः संज्ञार्थाः । इत्से अकार उच्चारणार्थः ।

संज्ञाः स्युः, सम्यक्प्रकारेण व्याहरणविधायिकाः(१) संज्ञास्तेषां भवन्तीत्यर्थः । अन्यथा यदि सर्व्वेषामादिवर्णेन सह सर्व्वेषामन्तः सकारः सर्व्वेषां संज्ञा भविष्यति तदा सर्व्वान् वर्णानुल्लिख्य एकाक्षरसंज्ञा कृता स्यात् न तु आद्यन्ताख्या इति (२) । प्रत्याहारा हि—अक् अच् अय् अम् अव् इक् इङ् इच् इल् (उक्) (३) ऋक् एङ् एच् एह् ऐच् हल् हव् हस् यल् यम् यप् वस् ञम् ञप् ञस् णङ् णम् णप् झभ् झय् झप् झम् ढभ् जय् खय् खप् खम् छत् चक् चप् शम् । एते चत्वारिंशत् शब्दाः प्रत्याहाराः ॥

४ । इत्कृते ॥ कृते इति निमित्तार्थे व्यं, एति गच्छतीति इत् । कस्मैचिदित्यादि । कस्यचित् कार्य्यस्य हेतोरुच्चार्य्यमाण उपदिश्य-

---

पठो, मध्ये इत्येकारान्ताव्ययशब्दोऽधिकरणमात्रवाची तेनात्तसूत्रे ये वर्णा" इति । का-वि । "मध्यशब्दस्येह मध्यावयववाचित्वे तु यकारवकारयोः प्राप्तिर्न स्यादिति दुर्गादास"

(१) सम्यक् प्रकारेण सम्योपयोगित्वेनेत्यर्थः । व्याहरणम्—मेलनम् ॥

(२) वक्ष्यमाणकमीत्यादिवत् येन केनचिदेकाक्षरेणैव संज्ञामकरिष्यदित्यर्थः । "स्युरिति बहुवचननिर्देशात् संज्ञानां नानात्वं ज्ञापितमिति" । का-वि ।

(३) आचार्य्यप्रयुक्ताः संज्ञाश्चत्वारिंशत् । सर्ववर्मणा तु परमतमनुसृत्य सहजटीकायां उक् इति संज्ञायाः प्रयुक्तत्वादिदानीं उक् संज्ञा कृतेति ।

५। आ वत् स्वर्घप्लु। (आ।१।, वत्।१।, स्वर्घप्लु।१।)। अ आ अ ३ इति वर्णत्रयं क्रमेण स्वर्घप्लुसंज्ञं स्यात्। वत् शब्दात् इ ई इ ३ इत्यादिषु च। स्व एज् नास्ति।

मानो वर्ण इत्संज्ञः स्यात्। तथाच आचार्य्यैर्यत् यत् कार्य्यमुद्दिश्यैव यद्यदुपदिष्टं तत्तत् प्रयोजनमुद्दिश्यैव इत् संज्ञा कृता। तेषां तु प्रयोगकाले अनवस्थानं अन्वर्थसंज्ञाबलादित्याह तस्येत्यादि। तस्य इत्संज्ञकवर्णस्य कार्य्ये कार्य्यकाले अनुच्चारः अप्रयोग इत्यर्थः। ननु अक् इङ् एजित्यादौ यथा प्रत्याहारार्थमुपदेशः कृञ्चां, तथा कथं नाकारादीनामिति चेन्न, आदिशब्दस्यावयवार्थत्वात्। अन्तशब्दस्तु स्वरूपावयवार्थ इति। इत्संज्ञस्य प्रयोगकाले अनवस्थानं दर्शयति यथेत्यादि। अचि अकारादिनववर्णमात्रघटितप्रत्याहारे कञ्चा अक्इङ्एजित्यादिसंज्ञाप्रयोजनका इत्यर्थः। एवं हसे अकारस्य प्रयोजनान्तराभावात् उच्चारणप्रयोजनकत्वमेव।

५। आ इति बहुवर्णोच्चरितं लुप्तप्रोक्तं दं, वत्शब्दः सादृश्यार्थव्यं, स्वर्घप्लु लुप्तप्रोक्तं दं, स्वश्च घश्च प्लुश्च तत्। नन्वेकवर्णस्य संज्ञात्रयं निरर्थकं, एकेनैव चरितार्थत्वात्। न च यथा प्रादेशिनिव्यसंज्ञात्रयं तथात्रापीति वाच्यं, इह फलभेदाभावात्, तत्र तु गिनिव्यानां फलभेदेनावश्यविधेयत्वमिति। नापि त्रिवर्णात्मकसंज्ञा वाच्या, एकाक्षरेणैव चरितार्थत्वात् गौरवाच्च, यतो मात्रालाघवेनाचार्य्याः पुत्रोत्सवं मन्यन्ते इति स्मरणात्। तस्मात् संज्ञात्रयेण

संज्ञित्रयमुपस्थाप्यते। तथाहि यदैकक्षणोच्चरिताकारस्तदा तस्य ह्रस्वसंज्ञा, यदा द्विक्षणोच्चरिताकारस्तदा तस्य दीर्घसंज्ञा, यदा बहुक्षणोच्चरिताकारस्तदा तस्य प्लुतसंज्ञा, बहुक्षणोच्चरितस्य एकद्विक्षणोच्चरितत्वं विना बहुक्षणोच्चरितत्वासम्भवात्। तथाचाहुः शिक्षाकाराः।

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकमिति॥

अत्र त्रिमात्रपदं बहुमात्रोपलक्षणम्। एके तु अय आय अय सौत्रत्वात् सन्धिः बहुलं ब्रह्मणीत्युक्तेः, तथाच छन्दोवत् सूत्राणि भवन्तीति भाष्यमित्याहुः। वदिति आगम्दमभिव्याहारात् अचत्वैकमात्रत्वद्विमात्रत्वबहुमात्रत्वधर्म्मेण सादृश्यं गृह्यते। तेन इ ई इ३ इति, आदिना उ ऊ उ३ ऋ ॠ ऋ३ ऌ ॡ ऌ३। (१) नन्वेचः सन्ध्यक्षरत्वात् ह्रस्वत्वाभावं दर्शयति ह्रस्वएज् नास्तीति। व्युत्क्रमेणान्वय स्तेन ए ए३ ओ ओ३ ऐ ऐ३ औ औ३ इति। अनच्त्वात् (२) प्रतच्छ प्ररच्छ इत्यादौ ह्रस्वत्वाभावात् ह्रस्वस्य तत् पितीति तत् न स्यात्।

---

(१) "केचित्तु आचदित्येकपदं मत्वा इ ई इ३ इत्यादीनां संज्ञात्रयं सिद्धं कुर्वन्ति, तन्मते कथमसिद्धस्योपपादनं सङ्गच्छते। अन्ततस्तु दधि भुङ्क्ते इति प्रयोगे अदृष्टान्ततस्य यथा आतुरत्वम् अर्थतो दधिभोजनद्वारा सिद्ध्यति तथात्र बलमादिश्याहुः"। का—मि।

(२) द्वयोर्व्यञ्जनयोर्हीनाभ्यामर्द्धमात्राभ्यां यद्येकमात्रा भवेत् तदा प्रतच्छेत्यादौ एकमात्रस्य ह्रस्वत्वेन प्राप्य तत् पितीति कथं तत् न स्यादित्याशङ्कायाः अनच्त्वात् व्यञ्जनानामनभिघातात् अचामेव ह्रस्वदीर्घप्लुतसंज्ञाविधानादित्यर्थः।

६ । अपोऽक् समोर्णं ऋटक् च । (अपः १।, अक् ।१।, समः १।, र्णः १।, ऋटक् ।१।, च ।१।) ।

समानो अपोऽक् च परस्परं र्णसंज्ञः स्यात्, ऋटक् च । साम्यन्त्वेकस्थानत्वम् ।

अत्रयं एह क ख ग घ ङाः कण्ठ्याः ।
इत्रयं च छ ज झ ञ शा ए ऐ यास्तालव्याः ।
ऋत्रयं ट ठ ड ढ ण र षा मूर्द्धन्याः ।
ऌत्रयं त थ द ध न ल सा वो दन्त्याः ।
उत्रयं प फ ब भ म वा ओ औ ओष्ठ्याः ।

एषां मध्ये यो येन समः स तस्य तत्र ततः ।

---

६ । अपः । अपाग्टकाः(१) प्रत्याहाराः । अपाकोः पृथक् दकरणात् अप् अपेनैव अक् अकेनैव र्णसंज्ञस्तेन कुम्भकार इत्यादौ न सह र्णे घं: । ऋकारऌकारयोः स्थानवैषम्यात् पृथग्टकोविधानं, तेन होतॢकार इत्यादौ ऌकारेण सह ऋकारस्य घं: । साम्यमिति समस्य भावः साम्यं ब्राह्मणादित्वात् ष्ण्यः । एकस्थानत्वमिति एकस्थानोच्चरितत्वमित्यर्थः । एहः प्रत्याहारः ए ओ ऐ औ ह इति । कण्ठ्याः कण्ठे भवाः, शरीरावयवाद् य इति यः, एवमन्यत्र । उभयत्र पाठात् ए ऐ कण्ठ्यतालव्यौ, ओ औ कण्ठ्यौष्ठ्यौ, वकारो दन्त्यौष्ठ्यः । नच अत्रयम् एहकवः (२) कण्ठ्या इत्यादि वाच्यं, अन्योन्याश्रय-

---

(१) अप + अक् + ऋटकः ।

(२) कव इति कुयन्द्राज्जसि रूपम् ।

दोषात् (१)। सवर्ण इति परे। एषामिति। एषां अ आ अ एइ क ख ग घ ङ इत्यादिवर्णानां मध्ये येन वर्णेन समो यो वर्णस्तस्य सामान्येन विधानेन सम आदेशः स्यात् नत्वसमादेशः। यथा भृज्जौ भृज्जः इत्यादि। तत्रेति परमी, पूर्व्वस्य परनिमित्तकसामान्यादेशे परवर्णस्य सम आदेशः। यथा भ्रान्तः अङ्कित इत्यादि। तत इति पी, परस्य पूर्व्वनिमित्तकसामान्यादेशे पूर्व्ववर्णस्य सम आदेशः। यथा वाग्घरिः अज्झसोरित्यादि। अनियमे प्राप्ते वचनम्। अत्र वदन्ति—

सूत्रे प्रान्तं यद्विधेयं द्यान्तं यत्प्राप्यते हि तत्।
त्रान्तं यत् तस्य योगे स्यात् प्यन्तं यस्मात् परन्तु तत्॥
यस्य स्थाने भवेत् कार्य्यं तत् ष्यन्तं समुदाहृतम्।
सान्तं गम्ये परे वाच्ये यस्मिन्नुपपदे हि तत्॥
क्वचिद्व्यत्ययतो (२) ज्ञेयमिदं पाणिनिसम्मतम्।

यथा—सहर्षेर्घ इत्यादि, चौसे लृतो ञिमित्यादि, वारादर्थैरित्यादि, आदिगोचोरित्यादि, जसशसोः शिरित्यादि, घेशप्रे इत्यादि। परे तु तुल्यास्यप्रयत्नं सवर्णमिति (१।१।८) (३) प्रयत्नसाम्ये। प्रयत्नास्तु—

---

(१) स च दोषः स्वपक्षसापेक्ष-परपक्षसापेक्ष-पक्षकत्वरूपः। तथाच वर्णानां स्थाननिर्द्देशे कर्त्तव्ये कु इत्युक्तौ सवर्णत्वज्ञानमेकस्थानत्वज्ञानमपेक्षते, एकस्थानत्वज्ञानमपि सवर्णत्वज्ञानमपेक्षते इत्यन्योन्याश्रयदोषापत्तेरित्यर्थः।

(२) व्यत्ययस्तु सेमयप्यदे, छञोऽहणौ रे इत्यादौ बोध्यः।

(३) ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति वृत्तिः।

७। चपोदिताकानिता णीः । (चपा ३।, उदिता ३।, अका ३।, अनिता ३।, णीः १।)

उकारेता चपेन इद्रहितेनाका णीं गृह्यते ।

आभ्यन्तरीणाश्चत्वारः स्पृष्टत्वादय ईरिताः ।
वाह्या विवारसंवारौ श्वासो नादश्च घोषतः ॥
अघोषश्चाल्पप्राणश्च महाप्राणोऽष्ट ते मता इत्याहुः ।

अस्मन्मते तु आस्यसाम्येनैव सिद्धेः ।

७। चपोदिता। उत् इत् यस्य स उदित् तेन, चप् प्रत्याहारः च ट त क प इति तेन, उदितेति चपेत्यस्य विशेषणं, नास्ति इत् यस्य सोऽनित् तेन, अकेत्यस्य विशेषणम्। तथाच च ट त कपा एते यदा उदितः स्युः तदा णीं गृह्लन्ति, एवं अक्, अ इ उ ऋ ऌ एते यदा इद्रहितास्तदा णीं गृह्लन्ति इत्यर्थः (१)।

---

(१) "अत्र सामान्यशब्दस्य विशेषपरत्वात् कार्य्यान्तरासम्पादकीभूतोदिच्चपः समानवर्णग्राहकत्वं, तेन मघोनस्तुङ्वेत्यत्र तुङः समानवर्णग्राहकत्वम्, अत्रोकारस्य कार्य्यान्तरसम्पादकत्वात्, कार्य्यान्तरन्तु एतत्कार्य्यातिरिक्तकार्य्यं त्रिदचोऽद्वेर्नुस्विति। दभोयाविति ज्ञापकात् कार्य्यस्वरूपेद्रहिताकः समानवर्णग्राहकत्वं त्यदां टेरत्कौ चैक्याच्चुद जयल्पीऽर्श आदित्वाद इत्यादिषु प्रदर्शितम्। स्व्यस्येत् सनीत्यत्र काम्यनाशोरक इत्यत्र च इकारबोधक-इत्शब्दोपादानं ज्ञापकसिद्धस्यानित्यत्वज्ञापनार्थम्। केचित्तु दभोयावित्यस्य ज्ञापकत्वेन प्रत्ययादेशयोः समानवर्णग्राहकत्वं नास्तीति व्याख्याय मघोन इत्यत्र तुङोऽपि समानवर्णग्राहकत्वमित्यूचुः। तन्न युक्तं स्तुस्तुभिः ष्टुभिः ष्टु इत्येतयोष्टुटोः समानवर्णग्राहकत्वापत्तेः। तत्रैव इ ई इत्यकसंज्ञाक्रान्तकार्य्यस्वरूपस्य ह्रस्वेकारप्रयोगेणाप्राप्तत्वमिति ज्ञापकसर्गविषयमेव, अतएव तेषां मते स्तुस्तुभिरित्यादौ न दोषः किन्तु मघोन इत्यत्र गत्यभाव इत्यवधेय"मिति। का-सि।

८। इकोऽरलेङ् गुः। (इक ६।, अर् अल् एङ् ।१।, गुः १।,)।

इकः स्थाने अर् अल् एङ् एते गुसंज्ञाः स्युः।

८। इकः। अर्‌च अल्‌च एङ्‌च तत्, एङ् प्रत्याहारः, यद्वा प्रत्येकं दं, एषां यो येन सम इति नियमात् इदुतोरपि एकार-ओकारौ भवतः न तु ऋकारस्य लृकारस्य च। ऋकारे त्रयोऽज्भागाः सन्ति तन्मध्यवर्त्ती तुरीयो रेफ इति (१) इकारो-कारभागसत्त्वेऽपि (२) अरुपदेशात् (३) अरेव गुसंज्ञः न तु इरुरौ; एवं लृकारेऽपि (४)। इक इति षीनिर्द्देशात् एङ एव एङ्, यथा प्रेजते परोखति इत्यादौ गुः। गुण इति परे।

(१) अस्यायमाशयः 'उरण् रपरः (उः ६। अण ।१। रपरः १।) इति पाणिनि-सूत्रम्। ऋकारस्य स्थाने अण अर्थात् अ इ उ एते त्रयो वर्णा रपरा भवन्ति। र इति रलयोः संज्ञा। ऋकारेणात्र लृकारोऽपि गृह्यते। तेन ऋस्थाने अर्, इर्, उर् एते स्युः। एवं लृ स्थाने अल् स्यादिति सूत्रार्थः।

(२) यद्यपि ऋस्थाने इर् उर् इत्यपि भवतस्तथापि।

(३) गुणसंज्ञासूत्रे इति शेषः।

(४) त्रयोऽज्भागा सन्तीत्यनेनान्वयः। तत्र इल्, उल् इत्येतयोरप्रयोगात् अलेव गुणसंज्ञः। अतएव कार्त्तिकेयसिद्धान्तेन च ऋकारे त्रयोऽज्भागाः इत्यादि एवं लृकारेऽपीत्यन्त तर्कवागीशवचनमुद्धृत्य "तर्कवागीशस्तु पाणिन्यादिमतमव-लम्ब्याह" इत्युक्तम्। अन्यच्च, "सर्वत्र गुविधायकसूत्रे इकः प्राप्त्यर्थमिदं इक्‌ग्रहणं, तेन गुर्द्धूङ इत्यत्र अन्त्येकः प्राप्तिः। आदिगेषोरित्यनेन इको गेषोरित्यनेन एङश्च गुविधानेनैव इक प्राप्तौ अत्र इक उपादानं व्यर्थमिति चेन्न,—स्वमोजसुषिरिति-वत् उद्देश्यविधेयभावान्वयात् गुपदेन अरलेङ् इत्यस्योपस्थितत्वात्। अत्र तु गुपदेन इक स्थानकर्त्तव्यारलेङ् वाच्यमिति न तु केवलारलेङ्। अत कार्य्येण कार्य्युपस्थाप्यते, तेन प्रजवदेतिसूत्रे त्रिपदेन कार्य्यिस्वरूपाणुपस्थाप्यते, अथ आरालैश् इत्यत्र अचपङ्पादि" इत्युक्तम्। "समत्यादिवर्ण्यकारयोरेकारः उवर्ण-

९ । अच आरालैज् त्रिः । (अचः ६।, आ आर् आल् ऐच् ।१।, त्रिः १।) ।

एते त्रिसंज्ञाः स्युः ।

१० । प्रपरापसंन्यवानुनिर्दुर्व्यधिसूत्परिप्रत्यभ्यत्यप्युपाङ् गिः । (प्र—आङ ।१।।।, गिः १।) ।

एते विंशतिर्गिसंज्ञाः स्युः ।

अत्राचार्य्यां स्वतौ, नातिक्रमेऽतिः, पर्य्यधी गतौ ।
अपिः पदार्थ-सम्भाव्य-गर्हानुज्ञा-समुच्चये ॥

---

९ । अचः । आश्च आर् च आल् च ऐच्च तत्, ऐच् प्रत्याहारः, सौत्रत्वात् सान्तविधेरनित्यत्वाद्वा न चैक्यादः ; शेषं पूर्व्ववत् । वृद्धिरिति परे ।

१० । प्रपरा । प्रश्च परा च अपश्च सञ्च निश्च अवश्च अनुश्च निश्च दुश्च विश्च अधिश्च सुश्च उच्च परिश्च प्रतिश्च अभिश्च अतिश्च अपिश्च उपश्च आङ् च ते । विंशतिरिति स्वरूपकथनम् ।

अत्रेत्यादि । अत्र प्रादौ स्वतौ पूजार्थौ न गी, यथा सुस्तुते, अतिस्तुते । अतिक्रमे अतिर्न गिः, फलोदयेऽपि क्रियाप्रवृत्तिरतिक्रमः तस्मिन्, यथा अतिसिञ्चति शालीनित्यादि । गतौ पर्य्यधी न गी, यथा परिसेधति अधिसेधति इत्यादि । याभ्यां पर्य्यधिभ्यां योगे गत्यर्थधुः स्वार्थं न जहाति, गत्यर्थधुसमभिव्याहृतौ पर्य्यधी

ओकारयोरौकारः । ततोऽवशिष्टौ अरलौ रलयोः समत्वात् क्रमेण ऋवर्ण-ऌवर्णयोः स्याताम्, समुदायसाम्याभावे आंशिकसाम्यस्यापि ग्राह्यत्वादि"ति-दुर्गादासः ।

इत्यर्थः, (१) तथाच अधिपरी अनर्थकाविति परे। अपिः पदार्थेत्यादि। पदार्थश्च सम्भाव्यश्च गर्हा च अनुज्ञा च समुच्चयश्च तत् तस्मिन्, अप्रयुज्यमानपदस्यार्थः पदार्थस्तस्मिन्, यथा सर्पिषोऽपि स्यात्, मधुनोऽपि स्यात्, बिन्दुपदस्यार्थे अपिशब्दः (२)। सम्भाव्यः सम्भावनं योग्यतेति यावत्, यथा अपि सिञ्चेन्मूलसहस्रम्। गर्हा निन्दा, यथा अपि स्तुयात् वृषलम्, अपि सिञ्चेत् पलाण्डून् ब्राह्मणकः। अनुज्ञा प्राकाम्यं, यथा अपि सिञ्च अपि स्तुहि यथेष्टं कुरु इत्यर्थः। समुच्चयः परस्परसंश्लेषः, यथा अपि सिञ्च अपि स्तुहि, उभयं कुरु इत्यर्थः, सर्व्वत्र षत्वाभावः फलम्। स्वादेरनुकरणात् क्विनॆलुक्, न गौणानुकरणयोरिति निषेधात्। ननु चादिर्गिर्निरित्यतः प्राक् गिसंज्ञा क्रियतां कथमिहेति चेन्न, धुसंज्ञायाः प्राक् गिसंज्ञाविधानं धोः प्राङ्नियतप्रयोगार्थं, तेन प्रकृष्टं नयति प्रणायकः, प्रकृष्टमेजते प्रेजकः इत्यादौ णत्वणत्वे स्तः, न तु प्रगतो नायकः, प्रनायकः, प्रगत एजकः प्रेजकः इत्यादौ (३), द्व्यययोगे व्यस्येति सत्वाभावात्। कथं तस्य व्यत्वमिति, चादिपाठात् (४)। ननु प्रजयति अभ्यागच्छति प्रतिष्ठते इत्यादौ

(१) अतएव उपसर्गस्य द्योतकत्वं न तु वाचकत्वमित्युक्तम्।

(२) अत्र अप्रयुज्यमानबिन्दुपदस्यार्थं आक्षिप्यते इति का-सि। पदार्थोऽल्पत्वं अपि सिञ्चति अल्पं सिञ्चतीत्यर्थ इति दुर्गादासः।

(३) प्रनायक इत्यादौ प्रादीनामध्याहृतगतिक्रियां प्रत्युपसर्गत्वं न तु नयनादिक्रियां प्रतीति। अतएव प्रगतोऽध्वानं प्राध्व इत्यत्र गेरध्वन इत्यप्रत्ययः।

(४) द्व्यययोगे विशेषणभावापन्ने सतीत्यर्थः, व्यस्येति-व्यश्यग्यनुकारेति सूत्रेण, सत्वाभावात्-समासत्वाभावात् न णत्वणत्वे इति पूर्व्वेणान्वयः। धातुप्रकरण-घटित-णत्वविधेः पूर्व्वं व्यश्यग्यनुकारेति समासविधानात् समासाभावे णत्वं नस्यादिति-

११ । भ्वादिर्धुः । (भ्वादिः १।, धुः १।) ।

भू-सत्तायामित्यादिर्गणो धुसंज्ञः स्यात् ।

प्रकर्षाभिमुख्यसामीप्यगमनं गेरेव कल्प्यते, तदन्वयव्यतिरेकानुविधानादिति(१) चेत् न, बभार्थराधां क्षमायैमृषामिति विशेषणेन धोरेवानेकार्थत्वकल्पनात्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वाच्च (२) । अतएव गेर्द्योतकत्वं, न वाचकत्वं, द्योतकत्वं हि सामान्यशब्दानां विशेषतात्पर्यग्राहकत्वम् । प्रतिष्ठते इत्यत्रापि विरोधिलक्षणया धोर्गमनोपस्थितितात्पर्यसंग्राहकत्वमिति । तथाचोक्तं कामधेनौ "क्रियावाचित्वमाख्यातुं प्रसिद्धार्थः प्रदर्शितः । प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः" । तथाच भट्टौ सहस्रशोऽसौ शपथानशप्यत्, अकरोदित्यर्थः ।

११ । भ्वादिः । भूरादिर्यस्य गणस्य सः, तद्गुणसंविज्ञान-

सूचितम् । तेन प्रनायक इत्यत्र उपसर्गत्वाभावात् समासाभावे णत्वं नस्यात् । प्रैजक इत्यत्र च अनुपसर्गत्वात् गेर्धोरित्यनेन गुणोऽपि नस्यात् । अतएवोक्तं "प्रादीनामुपसर्गत्वं धातुयोगे च सर्व्वदा । अव्ययत्वं लिङ्गयोगे कथितं पूर्व्वसूरिभिरित्युक्तेः प्रादिर्यदा धातुयोगी भवति तदा तस्योपसर्गत्वं, यदा तु लिङ्गयोगी तदा तस्याव्ययत्वमिति । प्रनायकः प्रगतो नायको यस्माद्देशात् स इत्यादौ प्रादयो नोपसर्गा अपि तु तत्प्रतिरूपकाः । तेन तेषां चादिगणे पाठात् निपातत्वेऽव्ययत्वं सिद्धमिति" ।

(१) अन्वयस्तत्सत्त्वे तत्सत्ता व्यतिरेकस्तदसत्त्वे तदसत्ता, ततश्च प्रजयतीत्यादौ सत्युपसर्गे प्रकर्षाद्यर्थः, असति च तस्मिन् तदर्थाभाव इत्येवमन्वयव्यतिरेकाभ्यां तत्तदर्थबोधनादित्यर्थः ।

(२) प्रजयति इत्यादौ जिप्रभृतीनां धातूनां प्रकृतित्वम् न तु प्रादीनामुपसर्गाणामिति ।

ष्टः। पृथ्वीवाचकभूशब्दस्य धुसंज्ञां निरस्यन्नाह भूसत्ताया-मित्यादि। गणशब्दः समूहवचनः। तथाच भूसत्तायामित्यादि-दशगणपठितानां क्रियावाचिनां धुसंज्ञेत्यर्थः। क्रिया तु क्वचित् सिद्धा, आकाशादेर्यदस्तित्वादिकम्। क्वचिदसिद्धा, तण्डुलादेः पाकाद्याश्रितक्रमरूपा पूर्व्वापरीभूतावयवा च (१) साध्यत्वेन विवक्ष्यते इति। यदुक्तं, यावत्सिद्धमसिद्धं वा साध्यत्वेन विवक्ष्यते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते (२)। यद्वा क्रिया धात्वर्थः (३)। स च परिस्पन्दनसाधनसाध्यः, यथा गमनादिः, अपरि-स्पन्दनसाधनसाध्योऽपि, यथा अवस्थानादिः। गणे पाठाभावात् अलपयति वर्पयति संज्ञपयति इत्यादेर्न धुत्वम् (४)। गणपाठात्तु श्वेतते मेघः, रज्यते रविः, नीलति तमालवनं, शोणति कोकनदं, स्पृशति वायुः, विशेषयति अर्थं, समवैति घटं, जानाति शिवं,

(१) पूर्व्वापरीभूतौ अवयवौ यस्यास्तादृशी, पूर्व्वावयवोऽधिश्रयणं तत्र चुल्ल्यां स्थालीस्थापनं, अपरावयवो जलतण्डुलाद्यर्पणम्। अतएवोक्तं विक्लित्त्यनुकूल-व्यापारः पाक इति।

(२) सिद्धं नित्यं सत्तादिकं, असिद्धं अनित्यं गुणाभावादिकं वा, यावत् यत् समस्तं वस्तु साध्यत्वेन प्रयत्नादिक्रियारूपत्वेन विवक्ष्यते, आश्रितक्रमरूपत्वात् आश्रितं प्राप्तं क्रमरूपं पूर्व्वापरीभावः येन तत् आश्रितक्रमरूपं तस्य भावस्तस्मात् सा क्रियेत्यभिधीयते।

(३) अस-नश प्रभृतिशब्दानां सत्ताभावादीनां पूर्व्वापरीभावस्याभावात् कथं क्रियात्वमित्याशङ्कयाह यद्वेति। पूर्व्वाचार्य्यकृतगणपठितानां भ्वादीनां वाच्यैव क्रियेति निष्कर्षः।

(४) शिष्टप्रयोगानुसारीदं लक्षणं (धातुलक्षणं) शिष्टैर एते (अलपयती-त्यादयः) न प्रयुक्ता इत्येषामर्थवत्त्वेऽपि धुत्वं नास्तीति कातन्त्र-टीका।

१२। सित्यादिः त्तिः। (सित्यादिः १।, त्तिः १।)
स्यादिस्त्यादिश्च त्तिसंज्ञः स्यात्।

सुखमिच्छति, शत्रुं द्वेष्टीत्यादौ गुण-विशेष-समवायादीनां क्रियात्वमेवेति शाब्दिकाः प्राहुः (१)। भूसत्तायाम् अस भुवीत्युक्तेरिहार्थकथने अन्योन्याश्रयो न दोषः। यद्यपि विकल्पे वा, विशेषे वि, आङ् च अवधारणे, इत्यादीनां क्रियार्थत्वं, विकल्पते इत्यादिप्रयोगात्, तथापि वादीनां विकल्पाद्यर्थद्योतकत्वान्न धुसंज्ञेति। जॄ-श्वि-प्रभृतीनां सौत्राणां गणे पाठासत्त्वेऽपि ध्वधिकारे पाठादेव धुसंज्ञा। दशगणा हि, भ्वाद्यदादि-जुहोत्यादि-दिवादि-स्वादयः स्मृताः। तुद्रुधादौ तनादिश्च क्रीचुरादौ इमे दश। चुरादेर्ञिरन्तत्वादेव धुत्वे सिद्धे विकल्पितञिरन्तानां ञेरभावपक्षे धुत्वार्थोऽत्र पाठः। पूर्व्वाचार्य्यकृतधातुपाठाभिप्रायेणेदं सूत्रितम्, अन्यथा स्वकृतगणक्रमेण जॄ-श्वि-स्तन्भु-विषेत्यादीनाम् इरित्त्वादेव ङे सिद्धे पृथग्विधानमनर्थकं स्यात्। धातुरिति परे।

१२। सित्यादिः। सिश्च तिश्च तौ सितौ तावादौ यस्य स सित्यादिः। तद्गुणसंविज्ञानह्वः। द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभिसंबध्नातीति न्यायादाह स्यादिस्त्यादिश्चेति। स्यादय एकविंशतिः त्यादयः साशीतिशतसंख्यका वक्ष्यन्ते। विभक्तिरिति परे।

---

(१) श्वेतते मेघ इत्यादौ श्वितप्रभृतीनां गुणादिवाचकत्वेऽपि गणपाठाद् धातुत्वमिति दर्शितम्। एवं गडि वदनैकदेशे, द्रव्येऽपि वर्त्तमानस्य गण्डेर्धातुत्वं,

१३। क्तद्व्वान्येकद्विबहुष्वेकशः।

(क्तद्व्वानि १।।।, एकद्विबहुषु ७।।।, एकशः ।१।।।)

क्तेरेकैकं वचनं क्रमात् क्त-द्द-व्व-संज्ञं स्यात्, तानि च क्रमादेक-द्वि बहुष्वर्थेषु प्रयुज्यन्ते।

१३। क्तद्द। एकम् एकम् एकशः वीप्सायां चशस्। एकशब्दस्य ससम्बन्धिकत्वात् (१) क्तिं विपरिणम्याह क्तेरिति। अर्थेष्विति। अर्थशब्देन सिल्याद्योरर्था गृह्यन्ते। तेन रामः, कृष्णः, देवैर्गम्यते स्वर्ग इत्यादौ लिधुभ्यां लिकर्त्राद्योरेकत्वद्वित्वबहुत्वविवक्षायां क्तद्व्वानि भवन्तीत्यर्थः। यद्यपि क्तद्व्वमेकद्विबहुष्वेकशः इति सूत्रिते सिद्धे व्वनिर्द्देशः क्वचित् व्यभिचारार्थः। तथाहि, विंशत्यादेरनावृत्तौ व्वे क्तम्। विंशत्यादिपरार्द्धपर्य्यन्तेभ्यो व्वे क्तं स्यादनावृत्तौ। एकोनविंशतिः शूराः, विंशतिः शैलवासिनां, परार्द्धमणवः। अनावृत्तौ किं, द्वे शते शूराणां, द्वे विंशती घटानामित्यादि। तथाच शतैस्तमक्ष्णामनिमेषवृत्तिभिरिति रघुः। तिष्यपुनर्व्वसुभ्यां भे चे द्दम्। तिष्य एकः, पुनर्व्वसू द्वौ, एभ्यो नक्षत्रे चे व्वे द्दं स्यात्। तिष्यश्च पुनर्व्वसू च तिष्यपुनर्व्वसू दृश्येते। तिष्यार्थग्रहणात् पुष्यपुनर्व्वसू सिद्धपुनर्व्वसू इत्यपि। तिष्य-

---

तेन गण्ड इत्यपि सिद्धमिति कातन्त्रपञ्जी। गडि गण्डे इति कविकल्पद्रुमः। "यत्र द्रव्यनिर्द्देशस्तत्र तच्चिह्नक्रियाविशेष उपलक्ष्यते इति मैत्रेयबोपदेवौ। केचित्तु गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्तव्यो नतस्यान्यत्र प्रयोग इत्याहु'रिति तट्टीकायां दुर्गादासः।

(१) सम्बन्धिसापेक्षत्वात्।

[illegible]

[illegible]

१४। क्त्यन्तान्यौ दली। (क्त्यन्तान्यौ १॥, द-ली १॥)

क्त्यन्तशब्दो दसंज्ञः स्यात्, अन्यस्तु लिसंज्ञः।

ब्रूवः वयं ब्रूमः। अविशेषणेति किं, अहं पटुर्ब्रवीमि। वयमप्रगल्भमनसः इति तु विशेषणविशेष्यभावस्य कामचारात् अस्मद एव विशेषणत्वम्। यदा तु अस्मद एव विशेष्यत्वं तदा न स्यात्। फल्गुनीप्रोष्ठपदाभ्यो भे द्वे। फल्गुनीभ्यां प्रोष्ठपदाभ्याञ्च द्वे व्वं वा स्यात् नक्षत्रे। पूर्व्वे फल्गुन्यौ पूर्व्वाः फल्गुन्यः; पूर्व्वे प्रोष्ठपदे पूर्व्वाः प्रोष्ठपदाः। प्रोष्ठपदाशब्देन भाद्रपदाशब्दस्यापि ग्रहणम्। भे किं, फल्गुन्यौ माणविके। वर्षादेः क्वद्वयोर्व्वा तु वल्वजादेः। वर्षादेः क्वि द्वे च व्वं नित्यं स्यात् वल्वजादेस्तु वा।

वर्षा दारा गृहा लाजाः सिकताश्च जलौकसः।
बहुलाः कृत्तिका आपो वस्त्रान्ति तु दृशा मघाः।
अविज्ञातार्थकाः सर्व्वे यथा तव सुताः कति।
वल्वजा वल्वजश्चाप्सरसश्चैवाप्सराः समा।
समाः कविभिरुक्ताः सुमनसः सुमना अपि॥

१४। क्त्यन्तान्यौ। क्तिरन्ते यस्य स क्त्यन्तः, क्त्यन्तश्च अन्यश्च तौ, दश्च लिश्च तौ। क्त्यन्तदेन लुप्तक्तिकस्यापि ग्रहणं, न दं तसाविति ज्ञापकात्। लिङ्गसंज्ञायाः प्राक् धु-क्ति-दसंज्ञाविधानात् धु-क्ति-दभिन्नस्य लिङ्गसंज्ञा इत्यर्थः (१)। तेन हन्धो दिप् अम्, अहन्

---

(१) अनुकरणस्थले तु धातुविभक्त्योरपि लिङ्गत्वं स्यात्, यथा भव. मा भो वा भम्, चे जसि वा इत्यादि।

१५। लुपि न सन्ध्याद्यविधौ ।

(लुपि ७।, न ।१।, सन्ध्याद्यविधौ १॥)

लुबिति लोपे कृते यो लुप्तस्तदाद्यन्तयोः सन्धिर्न स्यात्, तदाद्यस्य च यो विधिः स च न स्यात् ।

इत्यत्र न नस्य लुप्, (१) भवतीत्यादेर्न स्याद्युत्पत्तिश्च। हरिहरौ पीताम्बरः इत्यादौ समुदितस्यावयवस्य त्र्यन्तत्वेऽपि समुदितस्य लिसंज्ञा तस्यात्र्यन्तत्वात् । अन्यशब्देन इहार्थवदनर्थवतोर्ग्रहणं, तेन रामो गङ्गा ज्ञानं प्र परा च वा इत्यादीनां लित्वमिति। न चार्थवद्ग्रहणे नानर्थकस्येति परिभाषया अनर्थवतो न ग्रहणमिति वाच्यं, परिभाषायाः क्वाचित्कत्वात् । एष.बन्ध्यासुतो याति खपुष्पकृतशेखरः। कूर्मलोमपटाच्छन्नः शशशृङ्गधनुर्द्धर इत्यादौ तु समुदायस्य वाच्याप्रसिद्धावपि लित्वं, खण्डशः प्रसिद्धेः। पृथक् सग्रहणादिति परे (२)। दं पदं, लिर्लिङ्गम् (३)।

१५। लुपि। आदौ भवः आद्यः, अश्वासौ आद्यश्चेति आद्यः,(४) आदेर आद्यः.(५) अ आद्यो यस्य तदाद्यं, सामान्यत्वात्

---

(१) तत्र प्रकृतिनान्तलिङ्गस्य नस्य लुब्विधानात् ।

(२) पाणिनीये "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" १।२।४५। इति प्रातिपदिकस्य प्रथमलक्षणम् । "कृत्तद्धितसमासाश्च" १।२।४६। इति द्वितीयलक्षणम्। तत्र समासस्य पृथक् ग्रहणात् बन्ध्यासुतादिशब्दानां प्रातिपदिकत्वमित्युक्तम् ।

(३) प्रातिपदिकमिति परे।

(४) आदिरवर्ण इत्यर्थः ।

(५) अत्र आदेरिति पञ्चम्यन्तं, तेन लुप्तस्य आदिवर्णादुत्तरो योऽवर्णः स आद्य इत्यर्थः । अतएव भो अत्र इत्यादौ नाकारलोपः ।

क्लीवत्वं, पश्चात् आद्यश्च आद्यश्च आद्यश्च आर्द्यं, क्लीवाक्लीवयोः क्लीवं वा तु क्रमिति क्रम्। तस्य विधिराद्यविधिः, ततः सन्धिश्च आद्यविधिश्च तौ (१)। लुबिति वर्णानामदर्शनं विच्छेद इति यावत्। यद्यपि विष्ण इति, श्रिया एति, क इह, देवा अत्र, भो अत्र, राजभ्यां, राजभिरित्यादावुक्तरूपेण (२) सिध्यति तथापि सन्धिग्रहणं स्यादिलुपि (३) सन्धिज्ञापकमिति। अतएवाग्रे सन्धिग्रहणात् सन्धिलुप्येव न सन्धिरिति वक्ष्यति। शार्ङ्गिषु पिपक्षु इत्यादौ षत्वं स्यादेव अनवर्णाश्रितत्वात्। मघवान् इत्यादौ तु नो लुप् षेधाविति प्रकृतिनान्तस्यैव ग्रहणात् न नो लुप्। लुपि युक्तवत् लिङ्गं संख्या च (४)। लुबिति यो लुप्तस्तदर्थे युक्तवत् प्रकृतिवत् लिङ्गसंख्ये स्याताम्। अङ्गस्यापत्यानि अङ्गास्तेषां निवास इत्यर्थे

(१) सन्धिशब्देनेह सन्ध्यध्यायसूत्रविहितकार्य्यमिति बोध्यम्। आद्यविधिरित्यत्र आदिशब्दस्य साकाङ्क्षत्वात् सर्व्वत्र लुप्तस्येत्यनेनान्वयः। तेन लुप्तस्य य आदिवर्णस्तस्य विधिर्न स्यात्। अतएव राजभ्यामित्यादौ आन्निमभवीति नाकारः। एवं वज्रमाचष्टे इति ञौ टिलोपे क्विपि ञेर्लोपे वज्र् इति लिङ्गात् सौ स्यान्तस्यारादिति रेफस्य लुपि लुप्तस्यादिवर्णत्वेन जकारस्य चुड् इति कुड् न स्यात् तेन वज इत्येव। तथा लुप्तस्य य आदिरवर्णस्तन्निमित्तकोऽपि विधिर्न स्यात्। तेन राजभिरित्यादौ न ऐस्। गङ्गे अत्र इत्यादौ अहेऽमीयु इत्येकारस्य सन्धिनिषेधे तन्निमित्तकस्याकारलोपस्यापि निषेधदर्शनेन सन्धिनिषेधप्रसङ्गे आदिविधेर्निषेधेनैव तन्निमित्तकविधेर्निषेधस्यापि प्राप्तत्वात् भो अत्र इत्यादौ एडोऽत इति नाकारलोप इति दुर्गादासमतम्।

(२) आद्यविधिनिषेधेन।

(३) स्याद्यन्तप्रकरणीयसूत्रेण लुपीत्यर्थः।

(४) लुप्शब्देन लोपे कृते यथा सन्ध्याद्यविधिनिषेधस्तथा क्वचित् तद्धितप्रत्ययानां लुपि तदन्तशब्दानां प्रकृतिवल्लिङ्गवचने स्यातामिति परेषा मतमावेदयन्नाह लुपीति।

ण्यस्तस्य लुपि अङ्गा जनपदः। एवं पञ्चालाः पुण्ड्राः कुरवः। लुपि किं, लवणैः संस्कृतः, लवणाल्लुक्, लवणः सूपः (१)। द-भेदात् क्वचित् संख्येव प्रकृतिवत्। यथा खलतिकस्य गिरेरदूरभवानि वनानि खलतिकं वनानि (२), वरणादित्वात् (३) ण्यस्य लुप्। क्वचिल्लिङ्गं प्रकृतिवत् यथा—हरीतक्याः फलानि, हरीतक्यः फलानि, विकारे फले लुप्। से त्वविषयस्योत्तरदस्यैव युक्तवद्भाव इति भाष्यं, मथुरा च पञ्चालाश्च मथुरापञ्चालाः। त्वविषयस्योत्तर-दस्यैवेति किं, पञ्चालमथुरे। एकस्मिन्नाद्यन्तवद्व्यपदेशिवच्च। (४)

---

(१) लवणाल्लुगिति सूत्रेण लुकि कृते लुप्करणाभावान्नपूर्व्वोक्तं कार्य्यमिति।

(२) अत्र खलतिकशब्दस्य पुंस्त्वं न, केवलं वचनमेव।

(३) वरणादेश्च। वरणादेश्चतुर्थ्यर्थेषु उत्पन्नस्य त्यस्य लुप् स्यादिति तद्धित-टीकायां चातुरर्थिकप्रकरणे वक्ष्यतीत्युक्तं वरणादित्वादिति।

(४) इदानीमाद्यन्तशब्दार्थं निर्व्वक्ति एकस्मिन्निति। उक्तञ्च, आद्यन्तवदेक-स्मिन्।१।१।२१। इति पाणिनीयसूत्रटीकायां तत्त्वबोधिन्यां "सत्यन्यस्मिन् यस्य पूर्व्वो नास्ति स आदिः। सत्यन्यस्मिन् यस्य परो नास्ति सोऽन्तः इति लोके प्रसिद्धं, तदुभयमेकस्मिन्नसहाये न सम्भवतीति तत्र आद्यन्तव्यपदिष्टानि कार्य्याणि न स्युरतोऽयमतिदेश" इति। अस्यायमाशयः—यत्र द्वित्रा वर्णाः सन्ति तत्र यस्य पूर्व्वो नास्ति स एवाद्यः, यस्य च परो नास्ति स एवान्त्य इति वक्तुं युज्यते लोकप्रसिद्धेः। यत्र तु एक एव वर्णस्तत्र कथमाद्यन्तव्यवहार इत्याशङ्क्याह असहाये एकस्मिन् वर्णेऽपि आद्यन्तवत् कार्य्यमतिदिश्यते आरोप्यते। आद्यन्त-वदिति आद्यन्तयोरिवेति सप्तम्यन्ताद्वत्प्रत्ययः। आद्यन्तनिर्द्देशेन यत्कार्य्यं विहितं तदत्रापि भविष्यतीत्यर्थः। अतएव औपः तैङ इत्यादौ सुप् तिङ् शब्दाभ्यां ष्णे कृते लोकप्रसिद्धनिरुक्तादिलक्षणविरहितत्वेऽपि ष्णित्त्वेऽजिराद्यच इति वृद्धिः स्यात्। आययतीति इनृधोर्ञ्णौ ञ्णित्यन्त्येति वृद्धिः। एवमन्यत्र। व्यपदेशिवच्चेति। अस्यायमर्थः—"विशिष्टोऽपदेशो व्यपदेशः मुख्यो व्यवहारः सोऽस्यास्तीति व्यपदेशी मुख्य इति यावत्, तेन तुल्य' मिति तत्त्वबोधिनी।

१६। चादिर्गिर्निः। (चादिः १।, गिः १।, निः १।)।

चादिर्गणो गिश्च निसंज्ञः स्यात्।

एकस्मिन्नसहाये विषये आद्यन्तवत् कार्य्यमतिदिश्यते, व्यपदेशिवच्च। सौपः, तैङः, आदिवत्त्वादाश्चो त्रिः। एवम् आययति इत्यादावन्तवत्त्वात् त्रिः। आर्थं ऋदन्तत्वात् घ्यण्। एवम् इः कामदेवः तस्मिन् श्री अन्तवत्त्वाड्डी। व्यपदेशिवदिति, व्यपदेशस्ताद्रूप्येण कथनं विद्यते यस्य स व्यपदेशी तद्वत्, इह एव (१) यथा—एकोऽच् यस्य स एकाच् तस्मादिन्न स्यात् अवान् इत्यादौ।

१६। चादिः। च आदिर्यस्य स चादिः तद्गुणसंविज्ञानत्वेन चस्यापि निसंज्ञा। चादिर्यथा। च औषट् वषड्ड् स्वधा सह समं साकं पुरा हन्त किं वा तु स्वित् यदिवाऽथवा चण चन

---

(१) भिन्नान्यैकार्थेति सूत्रस्य टीकायां "समस्यमानपदार्थोऽपि अन्यपदार्थः स्यात्, व्यपदेश्य-व्यपदेशिवद्भावात्। यथा—शोभनशरीर शिवापुत्र', जनार्द्दनचालचतुर्थ एवे 'त्युक्तवता तर्कवागीशेन व्यपदेश्य—व्यपदेशिवद्भावो बहुव्रीहिसमास एवेति दर्शितम्; ततश्च यत्र बहुव्रीहौ समस्यमानपदार्थान्यपदार्थयोरभेदावगमस्तत्रैव व्यपदेशिवद्भाव इति निष्कृष्टार्थः।

उक्तञ्च कार्त्तिकेयसिद्धान्तेन अन्त्याजादिरिति सूत्रटीकायाम्—"अन्यपदार्थसमस्यमानपदार्थयोरैकार्थ्यप्रतिपादकत्वं कुत्रचिद् बहुव्रीहिसमासस्य स्थापितम्। यथा—शोभनशरीरः शिवापुत्र, जनार्द्दनचालचतुर्थं इत्यादौ अवयवावयविसम्बन्धेनान्यपदार्थाभावादैकार्थ्यप्रतिपादकत्वम्। अतएव ग्रन्थकृता कल्याणीपञ्चमाः रात्रय इति सङ्ख्यपूरण्या उदाहरणानन्तरं कल्याणपञ्चमीक पक्ष इति प्रत्युदाहृत्य रात्रि पूरणीवाच्या चेति पूर्वेण सम्बन्धमित्युक्त'मिति।

प्याड़ङ्ग हंहो नहि। किंवा वै नहिकं कुवित् पशु सुकं ह्याहेति हे है नवा तावद्वाढ़मलं कच्चेतिथमह सत्यं ह्यिकं-वाव रे। नूनं पर्य्यनुकं हहा ह नकिरा शश्वत् किमु प्राड़थो वेलायामुत हुं तथाहि चिदरे सत्रा धगाहो अथो। मात्रायां वड़हो कु हो वशमये नोचेदयि प्रत्यले स्वाहा हाह धिगाशु वौषड़हहावश्यं स्वहामास्म चेत्। संवत्तथाच शीघ्रं खुम् मा आङ् मा किनकिम् सु ना। ननु आहोस्विदाहोस्मित् सार्द्धं कच्चि-दतिस्वपि। यावत् शंसु न चेदेव होहो यद्वाधि हुं ऋते ओमेवं थाट् स्वकं नोचेत् ग्यच-क्ति-प्रतिरूपकाः (१)॥ श्रौषट् वौषट् स्वधा स्वाहा अलम् एतेषां पृथक् पाठः द्रव्ययोगार्थः (२)। कश्चित् स्वाहा सह समं साकं सार्द्धमलमिति स्वरादौ, ऋते उच्चैर्नीचैः शनैरित्यपि चादावाह। परि आङ् अप अनु अति सु अपि अधि प्रति उप इत्येषां भागमर्य्यादाद्यर्थद्योतकत्वात् द्रव्ययोगाच्च पाठः। गिप्रतिरूपकाः प्रदत्तमवदत्तमित्यादि। अच्प्रतिरूपकाः अ इ उ ऋ ऌ ए ओ ऐ औ इति। त्यन्तप्रतिरूपकाः वने ब्रूहि अस्ति खले मन्ये इत्यादि। दभेदात् द्रव्यवृत्तिचादीनां न नित्यं, तेन पशुः पुरुषः स्वाहा अग्नायी, तथाच स्वाहयेव हविर्भुजमिति रघुः। निपातानां द्योतकत्वं न तु वाचकत्वं, (३) तेन रामस्य

(१) एते चादयः साकल्येन परिसंख्यातुमशक्याः। यदुक्तं "इयन्त इति संख्यानं निपातानां न विद्यते। प्रयोजनवशादेते निपात्यन्ते पदे पदे" इति।

(२) चादयोऽसत्त्वे १।४।५७। इति पाणिनिः। अद्रव्यार्थाश्चादयोनिपात-संज्ञाःस्युरिति वृत्तिः। लिङ्गसंख्यान्वितं द्रव्यमिति तत्त्वबोधिनी।

(३) 'निपाताश्चादयो ज्ञेया उपसर्गाश्च प्रादयः। द्योतकत्वात् क्रियायोगे

१७। णमितोऽन्त्याचोऽन्तेऽन्त्यस्यादौ।

(णम्-इतः १॥, अन्त्याचः ५।, अन्ते ७।, अन्त्यस्य ६।, आदौ ७।)।

णित् यस्योच्यते तस्यान्त्यादचः परः, निदन्ते, ङिदन्त्यस्य स्थाने, मिदादौ स्यात्।

१८। परस्त्यः। (परः १।, त्यः १।)।

प्रकृतेः परो यः स त्यसंज्ञः स्यात्।

सदृशः देवस्य समुच्चय इतिवत् रामो न, देवस्य इत्यादौ षी न स्यात्, नञादेः सादृश्यादिद्योतकत्वात्।

१७। णमितः। णम् प्रत्याहारः, ण न ङ म इति इत् येषां ते णमितः। अन्ते भवमन्त्यम्, अन्त्यञ्च तत् अचेति अन्त्याच् तस्मात् अन्त्याचः, णिद्यस्येति षौनिर्देशात् यस्य णिन्निन्ङिन्मिद्विधानं तस्यायं नियमः। यथा पयांसि पुंस्कोकिलः पुमान् रामाणाम् इत्यादि। षौनिर्देशनियमात् ग्राही पच इत्यादौ न स्यात्।

१८। परः। परशब्दस्य ससम्बन्धिकत्वात् प्रकृतिमुपस्थापयतीत्यत आह प्रकृतेरिति(१)। ननु वहुगर्त्तः वहुपटुरित्यादौ

लोकाद्‌वगता इमे' इत्युक्तम्। निपाता अपि द्योतका एव न तु वाचकाः, तेषां वाचकत्वे तु घटस्य समुच्चय इत्यत्र यथा सम्बन्धे षष्ठी तथा घटच इत्यत्रापि षष्ठ्यापत्तिः। इदानीन्तु घटशब्दस्यैव लक्षणया समुच्चयवाचित्वाच्चकारस्य तद्द्योतकत्वान्न षष्ठीति दुर्गादासः।

(१) प्रत्ययात् प्रथमं क्रियतेऽसाविति प्रकृतिः, लिङ्गं धातुश्च। प्रतीयते येनार्थः स प्रत्यय इति रूढिरिति कातन्त्रवृत्तिः।

१९ । अं अः नुवी । (अं अः ।१॥, नु वी १॥) ।

अकार उच्चारणार्थः, विन्दुद्विविन्दुमात्रौ वर्णौ क्रमान्नुविसंज्ञौ स्तः ।

२० । क+पौm मून्यौ । (क+पौm१॥, मून्यौ१॥) ।

कपावुच्चारणार्थौ, वज्रगजकुम्भाकृती वर्णौ क्रमान्मूनीसंज्ञौ स्तः ।

वहोरप्रत्ययत्वप्रसङ्गस्तस्मिन् सति वहुगर्त्त इत्यत्र गर्त्तोत्तरादित्यनेन ईये कृते वहुगर्त्तीय इत्यनिष्टं स्यात् इति चेन्न, प्रकृतेः पर इति दिग्लक्षणा पौ, निर्द्देशविहितोपलक्षणत्वात्(१) लेवंहुः प्रागित्यत्र प्राक्शब्दयोगे पौविधानात् तस्य त्यत्वमिति दिक् ।

१९ । अं अः । अं अः इति लुप्तप्रोइं दम्, अं च अश्च तौ, नुश्च विश्च तौ । उच्चारणार्थं इति प्रयोजनान्तराभावात् । नुरनुस्वारः विर्व्विसर्ग इति परे ।

२० । क+पौm । क+श्च पm श्च तौ । यद्यपि कखपफयोर्मून्यावित्यत्र मून्योः स्थाने क+पाm विति कृते हरि+काम्यः कृष्ण m पाता इत्यादि सिध्यति, तथापि मूनीनुवीनां णत्वविधौ स्वरता स्वरसन्धौ व्यञ्जनता इत्यस्य ज्ञापनार्थं पृथक् संज्ञाविधानमिति । तेन उर+कार्येण उर m पेण इत्यादौ णत्वम् । हरि+काम्यः हरिm पाता इत्यादौ न यत्वम् ।

---

(१) दिग्लक्षणा पौति—सामान्यतो दिग्वाचकशब्दयोगे पञ्चमीत्यर्थः । निर्द्देशेति—यत्र यथा निर्द्देशेन यद्विहितं तस्य उपलक्षणत्वात् प्रतिपादकत्वात् परशब्दस्येति शेषः । तेन प्रकृतेः परवत् क्वचिन्निर्द्देशानुसारेण पूर्व्वोऽपि प्रत्ययसंज्ञः स्यादित्यर्थः ।

२१। हो झस्। (हः १।, झस्।१।)।

हकारो झस्संज्ञः स्यात्।

इति संज्ञापादः।

तथाचाहुः शिक्षाकाराः—अयोगवाहा अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयाः, एषां सामान्येनोपदेशः स्वरता षत्वविधौ व्यञ्जनता परगमनार्थमिति। मूर्जिह्वामूलीयः नीरुपाध्मानीय इति परे।

२१। होझस्। झस्प्रत्याहारेण यद् विधेयं तद्धकारेणापि भविष्यति इति, तेन बृंहितमित्यादौ हेऽपि नुः। यद्यपि अपसान्ते हकारोपदेशात् अर्हेण अघुचदित्यादि सिध्यति, तथापि एष प्रत्याहारस्यान्तहकारसन्देहनिरासार्थमिदमिति कश्चिदित्येके। वस्तुतस्तु एकस्थान प्रयत्न विशिष्ट वर्णद्वयाभाव-ज्ञापनाय हस्य पृथगुपादानमिति(१)। यद्यपि घपोदिताऽकानिता र्णः, लुपि न सन्ध्याद्यविधौ, णमितोऽन्त्याचोऽन्तेऽन्त्यस्यादाविति सूत्रितं, तथापि संज्ञायाः प्राधान्यात् संज्ञापादः। पादोहि एकार्थावच्छिन्नसूत्रसमूहः।

अथ रामो रामाः भवति भवतः इत्यादौ सन्धेरुपयुक्तत्वात् सर्व्वेषामादौ सन्धिं निरूपयति। सन्धिस्तु संहिता, संहिता तु परः सन्निकर्षः, स चार्द्धमात्रा-कालातिरिक्त-कालानुच्चरितत्वे सत्युच्चार इति। यदुक्तं, संहितैकपदे नित्या नित्या धातूपसर्गयोः। सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया इति।

---

(१) हो झस् इति सूत्रेणेति शेषः।

अथ सन्धिः।

२२। सह र्णे घः। (सह ।१।, र्णे ७।, घः १।)।

र्णे परे पूर्व्वस्य र्णेन सह घः स्यात्।

मुरारिः, लक्ष्मीशः, विष्णूत्सवः, धातृद्धिः, शक्लृदन्तः, होतॄकारः।

२२। सह। लुप्तप्रोक्तं दं, तस्मिन्निति सोनिर्द्दिष्टे पूर्व्वस्येति(१) नियमादाह पूर्व्वस्येति। सहशब्दस्य साकाङ्क्षत्वात् सप्तन्तर्णस्य क्तिविपरिणामादाह र्णेनेति। एज्झसोः र्णघयोरभावात् अक एव घः। मुरारिरित्यादि, मुरनाम्नोऽसुरस्यारिः, लक्ष्म्या ईशः, विष्णोरुत्सवः, धातुः ऋद्धिः, शक्लृनामा कश्चित् शक्लृश्चासावॢदन्त श्चेति, होतुश्चारित ऌकार इति वाक्यं, शाकपार्थिवादित्वान्मध्य-पदस्य लोपः। शक्लृदन्त इति नेच्छन्ति परे(२)। चैत्रेण सह मैत्रः स्थूलः, पुत्रेण सह आगतः पिता इत्यादौ सहशब्दस्य पृथक्त्व-प्रतीतावपि वालुकाभिः सह मृत्पिण्डं घटं करोति इत्यादिवत् अत्रैकत्वप्रतीतिरिति, लाघवात्। अतएव मुरारिरित्यादौ एक एव घः॥

---

(१) नियमश्चायम्—तस्मिन्निति निर्द्दिष्टे पूर्व्वस्य (१।१।६६) इति पाणिनि-सूत्रम्। सप्तमीनिर्द्देशेन विधीयमानं कार्य्यं वर्णान्तरेणाव्यवहितस्य पूर्व्वस्य बोध्य-मिति वृत्तिः।

(२) ऌकारस्य दीर्घस्य प्रयोगो नास्तीति पाणिनिक्रमदीश्वराविति दुर्गादासः।

२३। आद्गिचोर्गुणौ। (आत् ५।, इक्-एचोः ६॥, गुणौ १॥)।

अवर्णात् परयोरिगेचोरवर्णेन सह क्रमात् गुणौ स्तः। हृषीकेशः, दामोदरः। सन्धिग्रहणात् सन्धिलुप्येव न सन्धिः। माधवर्द्धिः, शिवल्कारः, कृष्णैकत्वं, मुकुन्दौकः, कृष्णैक्यं, भवौपधम्।

२४। गेर्धोरनेधिन एङ्ऋटकोः।

(गेः ६।, धोः ६।, अन्-एध्-इनः ६।, एङ्-ऋटकोः ६॥)।

२३। आत्। आदिति पी-कान्तं दं, अकाऽनिता र्णो ग्टह्यते इति। तस्मादित्युत्तरस्येति (१) नियमादाह अवर्णात् परयोरिति। हृषीकेश इति, हृषीकाणि इन्द्रियाणि तेषामीशः। दाम रज्जुः उदरे यस्य इति वाक्यम्। सन्धिग्रहणादिति। सन्धिग्रहणात् लुपि नेत्यादाविति शेषः, उक्तरूपेण(२) राजभ्यां राजभिः स्त्रिया एति भो अत्र इत्यादौ सिद्धे, सन्धिलुपि सन्धिप्रकरणीयसूत्रकृतलुपि न सन्धिः, एवकारस्य व्यवच्छेदात् (३) स्यादिलुपि सन्धिरित्यर्थः। माधवस्य ऋद्धिः, शिवेनोच्चारित ऌकारः, कृष्णस्य एकत्वं, मुकुन्दस्य ओकः स्थानं, कृष्णस्य ऐक्यं, भवस्य औषधमिति वाक्यम्। इगेचोरिति पौनिर्देशात् तत्समादेशः।

---

(१) नियमश्चायम्—तस्मादित्युत्तरस्य (१।१।१७) इति पाणिनिसूत्रम्। पञ्चमीनिर्देशेन क्रियमाणं कार्य्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयमिति वृत्तिः।

(२) तत्र स्याद्यविधिनिषेधेन।

(३) अन्ययोगव्यवच्छेदादित्यर्थः।

गेरवर्णात् परयोरेधिनवर्ज्जितस्य धोरेङृकोरवर्णेन सह क्रमात् णुब्री स्तः ।

प्रेजते, परोखति, अपार्च्छति । अनेधिनः किं—उपैधते, अवैति ।

---

२४ । गेधोः । एध् च इन् च तौ स्वरूपौ, तयोः समाहारः, न एधिन् अनेधिन् तस्य, एङ् च ऋक् च तौ तयोः, आत् सह चेत्यनुवर्त्तते । एधङ वृद्धौ, इन ल गतौ एतदुभयभिन्नस्य धोरवयवभूतयोरेङ्ऋकोस्तद्गेरवर्णात् (१) परयोरित्यर्थः, तेन प्रगत एजकः प्रैजकः इत्यादौ न स्यात् गतसमभिव्याहृतस्य प्रादेरेजतीत्यादेरगित्वात् (२)। स्वादिपाठे ऌकाराभावात् परत्नोदाहरिष्यति ।

---

(१) तद्गेरिति. तस्य धातोः पूर्व्ववर्त्तिनो गेरित्यर्थः ।

(२) उक्तञ्च गोयीचन्द्रेण—धात्वन्तरोपसर्गस्य सम्बन्धिनोऽवर्णात् परयोरेङृकौ गुणवृद्धी न स्तः । प्रगत एजको यस्मात् इति वाक्ये प्रैजक इत्यत्र प्र उपसर्गो गमेरेव न त्वेजेरिति । यदा तु प्रकृष्टार्थेन प्रशब्देन सह प्रादिसमासस्तदापि प्रैजक इति । प्रादीनां क्रियायोग एवोपसर्गत्वं, अत्र तु कर्त्तृयोगेनानुपसर्गत्वादिति ।

कार्त्तिकेयसिद्धान्तोऽप्याह—

अत्र गिरुपसर्गः "प्रादीनामुपसर्गत्वं धातुयोगे च सर्व्वदा । अव्ययत्वं लिङ्गयोगे कथितः पूर्व्वसूरिभि"रिति न्यायात् धातुयोगिप्रादीनां गित्वमभिहितं तस्य ग्रहणात् धातुसम्बन्धिनोरेङृकोः प्राप्तावपि धुग्रहणं धात्वन्तरसम्बन्धिगेरवर्णेन सह अनेन गुणवृद्ध्यभावार्थम् । एतेन मध्यपदलोपसमासेऽस्यानधिकारः सूचितः, तेन प्रगता एजका यस्मात् स प्रैजक इत्यत्र मध्यपदस्य गतभागस्य लोपे तत्सम्बन्धिनः प्रशब्दस्य एजधातोः सम्बन्धाभावान्नणुरिति । ननु प्रगत इति क्तान्तं नाम, एजक इति णकान्तं नाम, तद्योगिप्रादेर्गित्वं कथं सम्भवतीति चेत् सत्यं, प्राक् प्राप्तधातुयोगप्रादेर्गित्वं पश्चात् णकान्तक्तान्तादिनामयोगे क्वचिन्न निवर्त्तते इत्यवलम्बनस्य प्रेषः प्रेष्य इत्युदाहरता प्रदर्शितत्वात् । न च तर्हि

२५ । लिधोर्वा । (लिधोः ६।, वा ।१।) ।

लिधोस्तु पूर्व्वोक्तं कार्य्यं वा स्यात् । प्रेकीयति प्रैकीयति, प्रोघीयति प्रौघीयति, प्रार्च्चीयति प्रर्च्चीयति, प्राल्कारीयति प्रल्कारीयति ।

---

२५ । लिधोः । आदौ लिः पश्चात् धुस्तस्य । सिद्धे सत्यारम्भो नियमार्थः(१) । अनेधिन इति नानुवर्त्तते । पूर्व्वोक्तदेन गेरवर्णात् परयोर्लिधोरेङृकोरवर्णेन सह क्रमात् शुव्रौ वा स्त इत्यर्थः । एधिनो निवृत्तिं दर्शयति प्रैकीयति इन्लगतौ क (२) एकः तं इच्छति, क्योऽम्व्यादिति क्य अ ई एकीय, धुसंज्ञातिवादयः, व्यस्येति प्रस्य समासः, एवमन्यत्र । प्रोड्राम्यति प्रोड्रारीयति इत्यादौ परत्वादवर्णलोपः(३) ।

धात्वर्थद्योतकानां प्रादीनां धात्वन्तरसम्बन्धित्वाङ्गीकारे प्रकृष्टं एजते प्रेजते इत्यादावपि क्तान्तरूपधातुयोगित्वे एजधात्वादिसम्बन्धाभावात् सर्व्वथास्याविषय इति वाच्यम् । समस्यमानपदसम्बन्धिप्रादीनां तदर्थद्योतने पदभेदाभावात् मध्यपदलोपसमासानुपपत्तेः । प्रादीनां द्योतकत्वं आख्यातनिष्पन्नधातुयोगे ज्ञेयं, अतएव प्रकृष्टं एजते इत्यत्र प्रकृष्टार्थस्तु एजधातुना द्योत्यते, तेन धात्वन्तरत्वाभावादस्य विषय इति । ननु प्रसक्तं प्रतिषिध्यते इति न्यायात् समासनिष्पन्नप्रैजक इत्यत्र नामसम्बन्धिन एङः सन्धिः कथं प्रतिषिध्यते इति चेन्मत्यं, यद्यपि कृन्निष्पन्नं नाम इति प्रागभिहितं तथापि तेषां क्रियावाचकत्वात् क्वचित् धातुत्वं व्यवह्रियते, तेन भूस्योयोजनलक्षोऽर्कमित्यादौ भूस्य इत्यादीनां क्रियात्वेन व्यवहृतत्वात् अन्यत्रापि तथा चिन्त्यमिति ।

(१) लिधोर्वेति नियमसूत्रमित्यर्थः ।

(२) औणादिकः क प्रत्ययः ।

(३) विप्रतिषेधे परं कार्य्यम् । (१।४।२) इति पाणिनिः । तुल्यबलविरोधे परं कार्य्यं स्यात् । इति वृत्तिः ।

२६ । लोपोऽस्योमाङोः । (लोपः १।, अस्य ६।, ओम्-आङोः ७॥) ।

अवर्णस्य ओमाङोः परयोर्लोपः स्यात् ।

शिवायोन्नमः, शिवेहि, ब्रह्मोतं, राजर्षिः ।

स्थानिवदादेशः । द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः ।

---

२६ । लोपः । ओम् च आङ् च तौ स्वरूपौ तयोः, पुनरस्योपादानं सहादिनिवृत्त्यर्थं, लोपपदोपादानात् णुन्नीति निवृत्तम् । शिवायोन्नम इति लोपोऽप्यादेश उच्यते इति न्यायात् स्थानिवत्त्वेन अयां य्वोरिति यकारस्य न लुप् । शिवेहि इति आङ्पूर्व्वादिनधोर्हि शपोलुक् गिध्वोर्नित्यसापेक्षत्वात् आदौ आदिगेचोरिति णुः पश्चादनेनाकारलोपः । ब्रह्मोतमिति आङ्पूर्व्व उङ् शब्दे क्तः(१) ब्रह्म वेदः तस्य आ सम्यक् प्रकारेण उतं उच्चारितमिति यावत् । राजर्षिरिति आ सम्यक् प्रकारेण ऋषिः अर्षिः राज्ञोऽर्षिः राजर्षिः(२) । स्थानिवदादेश इति । स्थानमस्यास्ति स्थानी पूर्व्वस्थितः, स्थानीव स्थानिवत्, आदिश्यते असौ आदेशः, परस्मिन् पूर्व्वविधावच इति शेषः(३) । तथा च परनिमित्तकपूर्व्वविधौ कर्त्तव्ये अचः स्थाने य आदेशः स स्थानिवत्, स्थानी यथा

---

(१) वेञधातोः क्त उतमिति केचित् ।

(२) राजर्षिशब्दः प्रायशः कर्म्मधारयनिष्पन्नएव प्रयुज्यते । इह तु सूत्रोदाहरणार्थोऽयमिति ।

(३) स्थानिवदादेश इत्यस्मिन्नंशे परस्मिन् पूर्व्वविधावच इत्यंशोयोज्य इत्यर्थः ।

कार्य्याणां निमित्तं भवति तथादेशोपीत्यर्थः, तेन पिवति गणयति तातेहि इत्यादौ न गुव्रिजवादयः स्युः । अतिदेशकार्य्यं क्वचित् न स्यात्, यथा—न नु हि घं यलोपेपु दान्त-चप्-जव् जमेषु च । झभेषु षड्कडोरेवं जिश्च क्विजशोस्तु जिस्तथा(१) । एषु स्थानिवन्न स्यात् । संयन्ति इनो यादेशे मस्य नुः, न य स्थानिवत् । कथं किम्नुक्तं, यं दृष्ट्वा यस्योत्पत्तिः स तस्य सन्निपातः, सन्निपातविधिरनिमित्तं तद्विघाताय इति न्यायात् न नुः । दद्ध्यत्र इत्यादौ इकोयलादेशे स्वादनचीति धस्य हिः, न य स्थानिवत् । प्रतिदीव्न् इत्यादौ प्रतिदिवन् शब्दस्य पौपरे सदान इत्यल्लोपे व्यंनच् तयीति घंः, अल्लोपस्य न स्थानिवत्त्वं । यायावर इत्यत्र याधोर्यङि यायायधोर्वरे इसाल्लोप इत्यकारलोपे व्योर्लोप इति यकारलोपः, अकारलोपो न स्थानिवत् । कौ स्त इत्यादौ लोपोऽस्त्यसोरित्यकारलोपो दान्तकार्य्ये आवादेशे न स्थानिवत् । ओमाङोः स्थानिवत्वातिदेशादोमाङ्भिन्ने दान्ते अस्य विषयः । जक्षतुरित्यादौ अदधार्घसादेशे इनगमेत्युङलोपः झपझसोरिति घस्य क, उङलोपो न स्थानिवत् । धद्वे इत्यत्र धाधोर्ध्वे, शपोलुक्, द्वादिरिति हिः, यादशोरित्याकारलोपः, झभान्तस्यति खिदस्य

---

(१) तुरनुस्वारः हिर्हित्वं, घों दीर्घं, यलोपः, दान्त इति पदान्ते यत् कार्य्यं तत्, चप् जव् जम् एते प्रत्याहाराः—एषु कर्त्तव्येषु च्यादेशो न स्थानिवत । एव झभेषु झभ् इति प्रत्याहार । षड् इति शक्वाजेति विहित । कड् इति घुड् मुड् इत्यनेन विहितः । एषु कर्त्तव्येषु जि जिलोप न स्थानिवत् । तथा क्विजशो—क्विपि जो च परे यत्कार्य्यं तस्मिन् कर्त्तव्ये जिजिलोपो न स्थानिवत् । सयन्नोत्यादीन्येपामुदाहरणानि ।

घः, पश्चात् प्रकृते धस्य झप्झसोरिति जवे आकारलोपो न स्थानिवत्। गोन्ति इत्यत्र गोमत् क लेपने गोमधो ञंरन्तात् क्तिः, ञिलोपे मकारस्य नुः, पश्चात् जपे जम्नोरिति जमे अकारलोपो न स्थानिवत्। पिण्ढि इत्यादौ पिषधोर्हिः न णो ग्रे इति न्त्वे जपे जमनोरिति जमादेशे न् न स्थानिवत्। दाह-माचचाण इत्यादौ ञौ क्विपि दार्देघ इति घः धाक् इत्यत्र झभान्तस्येति झभादेशे न ञिः स्थानिवत्। एवं धाक् धाग्भ्या-मित्यादौ चपजवोरपि(१)। यायष्टि रित्यादौ यजधो यँङन्त-ञरन्तात् क्तौ पङि ञिलोपो न स्थानिवत्। पापक्तिरित्यादौ यङन्तञरन्तात् पचधोः क्तौ कङि ञिलोपो न स्थानिवत्। नावयतीति(२) क्विपि नौः इत्यत्र ऊटि ञिलोपो न स्थानिवत्। वादयन्तं प्रैरिरत् अवीवदत् इत्यादौ ञरादिकार्य्ये(३) ञिलोपो न स्थानिवत्। ननु कथमौङ्कारीयदिति (४) चेत् सत्यं भूयो-ऽमगादेरिति सूत्रमकृत्वा अजादिग्रहणमेवं ज्ञापयति सकृल्लक्ष्ये लक्षणं प्रवर्त्तते इति, तथाच एकस्यामो लोपे परामममादाय त्रिः। क्वचिदपवादविषये उत्सर्गोऽभिनिविशते इति न्यायात् उपशब्द-स्याङि वा अकारलोपः तेन उपेहि उपैहि। तथाच तामुपेहि

---

(१) चपि जवि च कर्त्तव्ये ञि र्न स्थानिवदित्यर्थः।

(२) नावमाचष्टे इति ञौ तिपि रूपम्।

(३) ञेः परे अङिपरे ङजे ह्रस्वादिकार्य्ये इत्यर्थः।

(४) ओङ्कारीयेति नामधातोर्दिपि रूपम्। अत्र ओम् शब्दे परे अमागम-स्याकारः कथं न लुप्यते इत्याशङ्क्याह नन्विति।

२७ । एवेऽनियोगे । (एवे ७, अनियोगे ७) ।

अवर्णस्य एवे परे लोपः स्यात् अनियोगे ।
अद्येव, नियोगेतु—अद्यैव गच्छ ।

२८ । वौष्ठोत्वोः से । (वा ।१।, ओष्ठोत्वोः ७॥, से ७।)

अवर्णस्य ओष्ठोत्वोः परयोर्लोपः स्यात् वा से सति ।
विम्बोष्ठः विम्बौष्ठः, स्थूलोतुः स्थूलौतुः । से किं तवौष्ठः ।

महाराज इति चण्डी, पूर्व्ववाशब्दव्यवस्थया वा। ननु पूर्व्वसूत्राद्वानुवर्त्तते कथं नित्यमिदमित्याह इयोरित्यादि, विभाषयोर्वाशब्दयोरित्यर्थः ।

२७। एवे। नियोगो व्यापारविशेषः, न नियोगः अनियोगस्तस्मिन्। सामान्यशब्दस्य विशेषपरत्वात् अनियोगेऽपि सादृश्यसम्भावनातिरिक्ते न लोपः, तेन इहैव वयं धीराः, मिथ्यैव श्रीः श्रियंमन्या इत्यादि। सादृश्यसम्भावनयोस्तु चर्म्मेव रज्जुः तदद्येवाभूदिति। एके तु सादृश्यानियोगेऽपि वालेव गच्छ मालेव तिष्ठ इत्याहुः ॥

२८। वौष्ठो। ओष्ठश्च ओतुश्च तौ तयोः, सः समासस्तस्मिन्। विम्बोष्ठ इति, विम्बाविव ओष्ठौ यस्य इति वाक्यं, एवं स्थूलश्चासावोतुश्चेति। सन्निहितालाभे विप्रकृष्टं विधिरपेक्षते इति न्यायात् यस्य दस्य ओष्ठोतुभ्यां स स्तस्यावर्णस्य तयोर्लोप इत्यर्थः, तेन हे राजपुत्रौष्ठौ ते, हे राजपुत्रौतुस्ते, हे देवदत्तौष्ठकमलं

३२। प्रस्योढ़ोढ्यूहाः। (प्रस्य ६।, ऊढ़-ऊढ़ि-ऊहाः १।।।)

प्रस्यावर्णात् परा एते त्रिं यान्ति। प्रौढ़ः, प्रौढ़िः, प्रौहः।

३३। वैषैष्यौ। (वा ।१।, एष-एष्यौ १॥)।

प्रस्यावर्णात् परावेतौ त्रिं वा प्राप्नुतः। प्रैषः प्रैष्यः, प्रेषः प्रेष्यः।

३२। प्रस्य। शाकटायनसम्मतत्वादूहग्रहणम्। प्रौढ़ इति ऊहधोः क्तः, एवं क्तिः प्रौढ़िः, ऊहसाहचर्य्यात् ऊहनिर्दिष्टक्तक्त्यो-र्ग्रहणम् न तु वहनिष्पन्नयोः, (१) तेन प्रोढ़ोभारः, प्रोढ़ीरथानां इत्यादि (२)। एवं आङ्पूर्व्ववहेरपि प्रोढ़ः प्रोढ़िः। प्रौह इति ऊहनमूहः भावे घञ्।

३३। वैष। प्रैष इति इष्य सर्पणे घञ्, प्रैष्य इति घ्यणन्त-निर्द्देशः (३) एष इति अनव्ययसाहचर्य्यात्, तेन प्रेष्य गतः (४) इत्यत्र यवन्ते न स्यात्। गेर्धोरिति नित्ये प्राप्ते वचनमिदं। नित्यमिति परे (५)।

---

(१) ऊढ़ इति वहेः क्तेन निष्पादितमिति बहूनां मतम्, ऊहधोःक्ते ऊढ़ इति कथं सिध्यतीति सुधीभिश्चिन्त्यम्।

(२) ऊढ़ोढ़ी अत्र वहनिष्पन्नौ।

(३) न तु आङ्पूर्व्व इष धातोः क्त्वाचो यपि रूपम्। अत्र हेतुमाह एष इति।

(४) आगत्य गत इत्यर्थः।

(५) प्रेषः प्रेष्य इति पदद्वयं ईषधातोः क्रमेण घञि घ्यणि च ईषः ईष्य इति स्थिते गुणे कृते सिद्धमिति सिद्धान्तकौमुदी।

३४। मनीषाः।—(१।।।)

मनीषाद्या निपात्यन्ते।

मनीषा, हलीषा, लाङ्गलीषा, शकन्धुः, कुलटा, सीमन्तः, पतञ्जलिः, सारङ्गः।

३४। मनी। शब्दव्युत्पादनप्रस्तावेऽर्थे कार्य्याभावात् मनीषाशब्दः स्वरूपपरः, (१) तस्य एकत्वे बहुत्वानुपपत्त्या त्वनिर्दिष्टमनीषाशब्दो गणं सूचयति(२)। तथाच भाष्ये "यल्लक्षणेनानुत्पन्नं तत्सर्व्वं निपातनात्सिद्ध"मिति। तस्य सिद्धिस्तु क्वचिद्वर्णविपर्य्ययैः क्वचिद्वर्णविकारैः क्वचिद्वर्णागमैः क्वचिद्वर्णनाशैः क्वचिद्धात्वर्थातिशयैर्ज्ञातव्या। तथाच—वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमिति ३)। मनीषादिर्य्यथा—मनीषा हलीषा शकन्धुः समर्थौ रथ्या पिशाचः कपित्थो दधित्थः। मरुत्तो तुलायो जिनो यस्कनिष्के मयूरो हनूमान् वृषी सिंह-रत्ने। सारङ्ग-कारस्कर-किष्कुकुम्भाः सीमन्त-कन्दर्प-धुरन्धराश्च। दूडाश-दूणाश-परःशताद्याः

---

(१) शब्दव्युत्पादनप्रकरणे वाच्ये, कार्य्याभावात्—तत्तत्कार्य्याणां साकल्येन लक्षणनिर्द्देशाभावात्। स्वरूपपरः मनीषाशब्दस्य स्वरूपनिर्द्देशः, यः शब्दो व्युत्पाद्यः स एव स्वरूपतो निर्द्दिष्ट इत्यर्थः। एतेनैवंविधाः शब्दा निपात्या इति सूचितमिति।

(२) इत्यादि-बहुवचनान्ता गणस्य संसूचका भवन्तीति न्यायादित्यर्थः।

(३) धात्वर्थातिशयेन धातूनामनेकार्थत्वकल्पनेन। निरुक्तं वेदाङ्गशास्त्रविशेषः। छन्दश्च, शिक्षाकल्पौ व्याकरणं निरुक्तं ज्योतिषन्तथा। छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुरिति। निरुक्तं पदभञ्जनमिति हेमचन्द्रः।

कुद्दाल कुस्तुम्बुरु-कुञ्जराश्च । यथायथं षोड़श-कान्दिशीक-कास्तीर-पारस्कर-मस्कराश्च । सस्तीर-भद्रङ्करणाग्निमिन्धा वलाहकोड़ुम्बर-विष्किराश्च । अट्टहासस्तथता दिवौकाः शुद्धोदनोदुम्बर गोष्पदानि । पतञ्जलिर्मस्करि-लाङ्गलीषा-ऽपरस्परापस्कर-तस्कराश्च । परस्परा ऽवस्करमन्तितान्तमं मध्यन्दिनाऽन्योन्यमनीषितञ्च । लोकम्पृणो धूर्ज्जटि-शोणिताशौ प्रतिस्कशोऽश्वत्थ-वृहस्पती च । समशनमटविर्दच्चिणतारं हनुमदुदूखलमुष्णङ्करणम् । कीचक-कुलटा-लोकम्पोणं तैलम्पाताऽङ्गणगव्यूती । प्रायश्चित्तं प्रायश्चित्ति-जीमूत-वनस्पति-गन्धर्व्वाः । अश्वत्थामास्पदमर्द्धशनं किष्किन्धो-लूखलमाश्चर्य्यम् । श्येनम्पाताऽर्णवो दूव्यो धेनुम्भव्या पृषोदरः । भ्राष्ट्रमिन्धः पृषोद्यानं केशवाद्यमुषर्वुधः । श्मशानमन्तिषत् इन्द्वं परोक्षं पुन्नलोऽन्तिमम् । अनभ्यासमित्यः पश्चार्द्धं दूड़भो ब्राह्मणस्तथा । प्रस्तुम्पति रजस्तुन्दमन्यदीयञ्च वाड्वलिः । प्रस्क-न्नोऽन्यत्कारकञ्च हरिश्चन्द्रः किकीदिविः । चर्म्मण्वती च राजन्वान् वृषणश्वो वृषण्वसुः । भुवर्लोको मनुष्यञ्चाऽङ्गिरस्वच्चेतरेतरम् । नभस्वञ्च मुकुन्दश्च मन्मथोऽन्ये प्रयोगतः ॥

मनीषेत्यादि । ईषङ सर्पणे सेमत्तात् सरोरिति स्त्रियां भावे अः मनस ईषा, हलस्य ईषा अनयोष्टेर्लोपः मूर्द्धन्यान्तः, ताल-व्यान्तस्तु हलीशा हलेशा इति केचित् । शकस्य नृपतेरन्धुः कूपः । समोऽर्थोऽस्य समर्थः । रथेन पाति रथ्या नदी वर्हिष्ठादित्वात् षः । पिशितमश्नाति पिशाचः । कपयस्तिष्ठन्त्यस्मिन् कपित्थः । एवं दधित्थः । मरुता दत्तो मरुत्तः । अप्सु लुनाति लुलापो महिषः ।

जितमनेन जिनः। यशः कीर्ति यस्कः। निकाम्यते निष्कं हिरण्यम्। मह्यां रौति, मेऊ इति रौति वा मयूरः। हनुरस्यास्तीति हनूमान्। ब्रुवन्तः सीदन्त्यस्यां बृषी (१)। हिनस्तीति सिंहः अत्र अक्षरविपर्य्ययः। रतेस्तननं(२)। सारमङ्गं यस्य सारङ्गः(३)। कारं करोति कारस्करो वृक्षः। कारकरोऽन्यः। कीयते ज्ञायते मृगय्वादित्वात् कुः किष्कुः। केनोभ्यते(४) कुम्भः। सीमानमन्तति सीमन्तः केशविन्यासः, अन्यत्र सीमान्तः। कं न दर्पयति कन्दर्पः। धुरं भारं ध्रियते (धरति) धुरन्धरः। दुःखेन दाश्यते दूडाशः। दुःखेन दाश्यते दूणाशः मूर्द्धन्यः। शतात् परं परःशतं वेः श इति कश्चित्, एवं परःसहस्रमित्यादि। कुं उद्दालयति कुद्दालः। कुत्सितं तुम्बुरुः कुस्तुम्बुरुः धन्याकम्। कौ जीर्य्यति कुञ्जरः। यथायथेत्यर्थे यथायथं क्लीवत्वम्। षड्धिका दश षोड़शः। कां दिशं गच्छामीति चिन्तयन् पलायितः कान्दिशीकः। कु ईषत् कुत्सितं वा तीरं प्रान्तभागोऽस्य कास्तीरम्। पारं करोति पारस्करो देशः। मा क्रियते अनेन मस्करो वेणुः। सत् ईषत् तीरं सस्तीरम्। अभद्रं भद्रं करोत्यनेन भद्रङ्करणम्। अग्नेरिन्धः अग्निमिन्धः। बलादाहृतं कामनेन बलाहको मेघः। उद्गतोऽम्बरं उडुम्बरः। विकिरति विष्किरः शकुनिः। वेदपाठात् विकिरोऽपि। अट्टं अट्टं

---

(१) ब्रुतिमः सीदन्त्यस्यामिति कुत्रचित् पाठः।

(२) रतिं अनुरागं तनोतीत्यर्थः।

(३) सारङ्गपातकादिः, अन्यत्र साराङ्ग इति।

(४) केन जलेन उभ्यते पूर्य्यते इत्यर्थः। उनुभ दे षभ्।

हसति अट्टहासः(१)। अट्टाट्टहास इति मैथिलाः। तथ्यस्य भावस्तथता। द्यौरोकः स्थानं यस्य दिवौकाः, यद्यपि दिवेत्यकारान्तोऽप्यस्ति तथापि वान्तादोकारनिवृत्त्यर्थं पाठः। शुद्ध ओदनो यस्य शुद्धोदनः। उडुम्बरवत् उदुम्बरः। गवां पदं गोष्पदं गोभिः सेवितो देशो मानञ्च। पततां ज्ञानिनां अञ्जलिर्यस्मै स पतञ्जलिरनन्तः। काम्यकर्म्माणि मा कर्त्तुं शीलमस्य मस्करी भिक्षुः। हलीषावत् लाङ्गलीषा। अपरे च अपरे च अपरस्पराः क्रियासातत्ये, अपरस्पराः सार्था गच्छन्ति अविच्छेदेन यान्तीत्यर्थः। अपकरोतीति अपस्करो रथाङ्गं, अन्यत्रापकरः। तत्करोतीति तस्करश्चौरः। परे च परे च परस्परं क्रियाविनिमये। अवस्करः पुरीषे, अन्यत्रावकरः। अन्तिकादन्तितः कस्य तः। अन्तिकात् तमे तिकलोपे अन्तमः। दिनस्य मध्यं मध्यन्दिनम्। अन्ये च अन्ये च क्रियाविनिमये अकारस्योकारे अन्योन्यम्। मनसा ईषितं मनीषितम्। लोकस्य पृणे मन् लोकम्पृणः, लोकम्पृणमिति केचित्। धूरिव जटा यस्य स धूर्ज्जटिः शिवः। शोणितमर्शो यस्यास्ति स शोणिताशीं। प्रतिष्कशः पुरोयायी (२) अन्यत्र प्रतिगतः कशां प्रतिकशोऽश्वः। अश्वास्तिष्ठन्त्यस्मिन् सोऽश्वत्थः(३)। बृहतां पतिः

(१) अट्टमट्टं हसनमित्यर्थेऽपि। मूलोदाहरणे ढात् षसिति षण्। हासे वाच्ये एव निपात्य इति।

(२) प्रतिपूर्व्वक कशेः पचादित्वादन् इति सिद्धान्तकौमुदी।

उक्तञ्च "ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः" इति काशिका।

(३) सदा चलदलत्वेन अश्व इव तिष्ठतीति डे अश्वत्थ इत्यमरटीकायां भरतः।

बृहस्पतिः सुराचार्य्यः। सममशनं समशनम्। अटन्तो वयः पक्षिणो यत्र अटविः अरण्यम्। दक्षिणतीरमित्यर्थे दक्षिणतारं, दक्षिणश्च तत्तीरञ्चेति वाक्यं, वेदपाठात् दक्षिणतीरमपि। हनूमान् पूर्ब्ववत्। ऊर्द्धं खन्यते उदूखलम्। उष्णस्य करणे मन् उष्णङ्करणम्। चीक कि मर्षणे णकः वर्णविपर्य्यये कीचको वंशदैत्ययोः। कुलान्यटति कुलटा भिक्षुकी असत्या च(१)। लोकम्पृणमिति लोकम्पृणवत्। तिलपातोऽस्यां क्रियायां तैलम्पाता पितृक्रिया। अह्नस्त्वस्मिन् अह्नणं मूर्द्धन्यात्तम्। गवा यूतिः गव्यूतिः क्रोशयुगम्। प्रायात् चित्तचित्त्योः सुम् (२) प्रायश्चित्तं प्रायश्चित्तिः। जीवनं जलं मूतं बद्धमनेन जीमूतो मेघः। वनस्य पतिः वनस्पतिः वृक्षः। गानं धर्म्मोऽस्य गन्धर्व्वः। अश्वस्येव स्थाम (बलं) यस्य अश्वत्थामा द्रोणपुत्रः। आस्पदं प्रतिष्ठायाम्। अर्द्धमशनं अर्द्धशनम्, इदं नेच्छन्ति केचित्। किञ्चित् ध्यायते चिन्त्यते अस्मिन् किष्किन्धोऽद्रिः। उलूखलमुदूखलवत्। आश्चर्य्यमद्भुते, अन्यत्र आचर्य्यं कर्म्म शोभनम्। श्येनपातोऽस्यां क्रियायां श्यैनम्पाता मृगया। अर्णः पानीयमस्ति अर्णवः केशादित्वाद्वे सकारलोपः। दुःखेन ध्यायति दूढ्यः।

---

(१) 'अटतीत्यटा पचाद्यच् टाप्। कुलस्य अटा कुलटा। यदि तु कुलम् अटतीति विगृह्यते तदा कर्म्मण्यणि ङीपि कुलाटीति स्यात्"—इति तत्त्वबोधिनी।

(२) चित्त चित्तिशब्दौ निश्चयार्थौ। तथाच प्रायोनाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥ निश्चयसंयुक्तं पापक्षयमात्रसाधनत्वेन निश्चितमित्यर्थः।

धेनुर्भविष्यति धेनुम्भव्या । पृषदुदरमस्य पृषोदरः । भ्राष्ट्रस्येन्धं मन् भ्राष्ट्रमिन्धः । पृषदुद्यानमस्य पृषोद्यानम् । केशिनमवधीत् केशवः । आधारयति आध्यायतीति वा आढ्यः । उषसि बुध्यते उषर्बुधः, उषोबुध इति कश्चित् । शवानां शयनं यत्र श्मशानम् । अन्तिके सीदति अन्तिषत् । द्वौ द्वौ द्वन्द्वं, द्वन्द्वं रहसि चार्थेच वैरे मिथुनयुग्मयोरिति धरणिः । अक्षिभ्यां परं परोक्षं, पृषोरसि साधयन्ति केचित्, तन्मते अत्र पाठः परशब्देऽनिष्टवारणार्थः । पूर्य्यते गलति च पुद्गलः शरीरम् । अन्तिके भव इत्यर्थे मस्त्यः, मे कस्य लोपः, अन्तिमः । यद्वा अन्तिकात्तमः प्रकृतिप्रत्यययोः क-त-लोपे अन्तिमः । वेहपाठात् अन्तिकतमश्च । अनभ्यासे दूरे इत्यः (१) मंश्च अनभ्यासमित्यः, परिहार्य्यसन्निधिरित्यर्थः । पश्चादर्द्धं पश्चार्द्धम् । दुःखेन दभ्यते वञ्च्यते दूडभः । वाह्नितं पापमनेन ब्राह्मणः । गवि कर्त्तरि प्रस्य सन् तुम्पती । प्रस्तुम्पति गौः अन्यत्र प्रतुम्पत्यश्वः । (२) अजस्येव तुन्दमस्य अजस्तुन्दं नगरम् ! अन्यस्येदं अन्यदीयम् । वाग्वादस्यापत्यं वाड्वलिः । प्रगतं कल्मषं पापमस्य प्रस्कन्न ऋषिः । अन्यस्य कारके दन्, अन्यत्कारकं । हरिरिव चन्द्रो रमणीयः, हरिश्चन्द्रो राजा । किकीपूर्व्वदिवधोः क्वौ दिवेर्दिव्यादेशः, किकीदिविः चातकपक्षी । चर्म्म अस्या अस्ति चर्म्मण्वती नदीकदल्योः । राजा अत्रास्ति राज-

---

(१) इत्यः गम्यः इनधोः ढे क्यप् ।

(२) तुम्पतीति तौदादिक-तुपधातोस्तिपि रूपम् । प्रस्तुम्पति गौः हिनस्तीत्यर्थः ।

३५। यलायवायावोऽचीचः।

(यल्-अय्-अव्-आय्-आवः १॥, अचि ७।, इचः ६।)

इचः स्थाने य् व् र् ल् अय् अव् आय् आव् एते अचि परे क्रमात् स्युः। त्र्यम्बकः, विष्णूशौ, धात्रचुतौ, लाकृतिः, हरये, प्रभवे, नायकः, पावकः।

न्वान्, सुराज्ञि देशे, अन्यत्र राजवान्। वृष्णोऽश्वः वृषणाश्वः। वृष्णोवसुः वृषणवसुः। भुवर्लोक इत्यत्र सस्य रेफः। मनुरिव मनुष्वत्। अङ्गिरा इव अङ्गिरस्वत्। इतरे च इतरे च क्रियासातत्ये इतरेतरम्। नभ इव नभस्वत्। मुक्तिं ददातीति मुकुन्दः, वेहपाठात् मुक्तिदश्च। मनो मथ्नाति मन्मथः कामः। शेषं प्रयोगानुसारेण ज्ञेयम्। अन्यस्याऽपौत्रन्तस्य दन्नाशादौ से। पौत्रन्तभिन्नस्यान्यस्य दन् स्यात् आशादौ से सति, अनावितौ। अन्याचासावाशाचेति अन्यदाशा। एवं अन्यदाशीः अन्यदास्थितः अन्यदास्था अन्यदर्थः अन्यदूतिः अन्यद्रागः अन्यदुत्सुकः। अर्थशब्दस्य वेहपाठात् अन्यार्थोऽपि। अपौत्रन्तस्येति किं अन्यस्यान्येन वा आशा अन्याशा (१)।

३५। यल। यलाजिचः प्रत्याहाराः। इच इति पौक्तान्तं(२) यलस्यावयवापेक्षया यथाक्रममुक्तम्। त्र्यम्बक इति त्रीणि

---

(१) "रूढ़िशब्दा एते कथञ्चिद्व्युत्पादयन्न इत्यवयवार्थे आग्रहः कार्य्यः" इति तत्त्वबोधिनी। एते समीपादयः शब्दा इत्यर्थः।

(२) इच इति प्रथमे पौष्यान्तमित्यपि क्वचित्पाठः।

३६ । वाव गोर्दान्ते ।

(वा ।१।, अव ।१।, गोः ६।, दान्ते ७।) ।

गोरिचः स्थाने अवः स्याद्वा अचि परे दान्ते ।

गवेशः, गवीशः । दान्ते किं गवे ।

अम्बकानि चक्षूंषि यस्य त्र्यम्बकः, लोचनं चक्षुरम्बकमिति शाश्वतः । विष्णुश्च ईशश्च तौ, धाता च अच्युतश्च तौ, लृगाकृतिर्यस्य इति वाक्यानि ।

३६ । वाव । अव इति लुप्तप्रथमैकं दं, पृथक् विधानादकारान्तादेशः । दस्यान्तो दान्तस्तस्मिन् । गोरिच इति अन्येजभावादोत इति शेषः । गवेश इति गवामीशः से कोर्लुकि-दान्तत्वादवः । चित्रगविह इत्यादौ लाक्षणिकत्वान्न स्यात्(१) ।

---

(१) लाक्षणिकत्वात् गौणत्वादिति । एतेन गोरिच इत्यत्र मुख्यस्यैव गोशब्दस्येति तर्कवागीशस्याशयः ।

पूर्व्वत इजचावनुवर्त्तेते । इचः समुदायस्य प्रयोजनाभावेऽपि लाघवादनुवर्त्तनं वसोऽरस्येत्यत्र वस इम्-विधान-लाघववत् । ननु वाव गोः से इति कृतेऽपीष्टसिद्धौ यत् दान्तग्रहणं तत् निमित्ताचोऽपि समासावयव-पदादित्वज्ञापनार्थं तेन गवेश इत्यादयः सिद्धाः । अन्यथा अजाश्वगावः, परमगवः, इत्यादौ अवादेशापत्तेरिति । का-वि ।

वृत्तौ गोरिचो ग्रहणात गवाग्रादेरिति ह्रस्वे उकारस्याप्यवादेशे चित्रगवाग्र्यं इत्यादि सिद्धमित्येके इति दुर्गादासः । सिद्धान्तकौमुद्यान्तु सर्व्वत्र विभाषा गोः (६।१।१२२) इति सूत्रोदाहरणे चित्रग्वग्रमित्युदाहृतम् ।

गवीश इत्यत्र अयां द्वोरित्यादिना वकारलोपाभावस्तु तत्सूत्रीयवाशब्दस्य व्यवस्थावाचित्वादिति दुर्गादासः । कार्त्तिकेयसिद्धान्तस्तु अयां य्वोरित्यत्र श्रिया एति विष्णा उत्क इत्याद्युदाहरणेनास्यासमास एव विषयस्य ज्ञापितत्वादित्याह ।

३७। गवेन्द्रगवाक्षौ। (१॥)। (१)

नित्यम्।

३८। अयां य्वोर्लुब्वा।

(अयां ६॥।, य्वोः ६॥, लुप् ।१।, वा ।१।)।

दान्ते स्थितानामयादीनां यवयोर्लुप् स्याद्वा।

हरएहि हरयेहि, अभइदं अभविदं, श्रियाएति श्रियायेति, विष्णाउत्कः विष्णावुत्कः।

३७। गवे। गवेन्द्रश्च गवाक्षश्च तौ। गवामिन्द्र इति वाक्यम्। गवामक्षीव गवाक्षः, वातायने एवाभिधानात् अन्यत्र प्राण्यङ्गे गवामक्षीव गोऽक्षं इति, असंज्ञायां नित्यमकारलोप इति भाष्यम्। गोऽक्षं गो अक्ष मित्यन्ये।

३८। अयां। य च व च तौ तयोः। अयामिति व्वनिर्देशो गणार्थः, तेन अय् अव् आय् आव् इत्येषां सामान्यतो ग्रहणं(२)तेन अव्ययमाचक्षाण आस्ते अव्य-आस्ते अव्ययास्ते, मूलहयमाचक्षाण

---

(१) अपरन्तु मुद्रित-मुग्धबोध-पुस्तकेषु "गवेन्द्र-गवाक्षौ नित्य" मित्यंशो एकसूत्र्येन निर्द्दिष्टः। तन्न समीचीनं मन्यामहे, बहु-टीकाकार-मत-विरुद्धत्वात्। ततश्च "गवेन्द्र गवाक्षौ" इति सूत्रं, नित्यमिति वृत्तिः। अत्र प्रमाणानि—दुर्गादासेन गवेन्द्र इत्युद्धृत्य विभायाद्वयमध्यवर्त्तित्वादस्य नित्यत्वमित्युक्तम्। कार्त्तिकेय-सिद्धान्तेनापि तर्कवागीशवत् समासवाक्यं लिखित्वा "नित्यमिति वृत्तिः, वाद्वय-मध्यवर्त्तित्वात् नित्य' मित्यभिहितम्। अतोऽत्र पुस्तके गवेन्द्रगवाक्षाविति पृथक् सूत्रत्वेन निर्द्दिष्टम्।

(२) यथा कथमपि अकाराकाराभ्यां यवयोर्योगनिष्पत्ता अयवादयो ग्राह्या न तु पूर्व्वसूत्रादिष्टानामेवेत्यर्थः।

३८। एङोऽतः। (एङः ५।, अतः ६।)।

दान्ते स्थितादेङः परस्याकारस्य लुप् स्यात्। हरेऽव, विष्णोऽव।

आस्ते मूल आस्ते मूलवास्ते इत्यादि। वाशब्दस्य व्यवस्थावाचित्वात् हवे च नित्यं, तेन अव्यहसति मूलब्रूहि। हवे किं अव्ययस्तु मूलवस्तु। आत् क्विवन्तय्वोरेव नित्यमिति केचित्। क उ पश्यन्ति, द्वा उ पश्यत इत्यादौ नित्यं उचि य्वोर्लुवित्यन्ये। आद् य्वोर्लुब्वेति सिद्धे अयामिति निर्द्देशात् अज्जय्वोरनाद्योर्हसि नित्यं लुप्। (१) तेन उं शिवं अधिकृत्य आस्ते, अधु आस्ते अध्वास्ते, साधोरीर्लक्ष्मीः तस्या उदयः, साध्वौ उदयः साध्युदयः इत्यादि। अनाद्योरिति किं, इश्च उश्च तौ यू तयोरर्थः य्वर्थः। अज्जय्वोरिति किं वाय्वर्थः। हसि किं हर्य्योः शम्भ्वोः। आद् य्वावीषत्स्पृष्टतरौ वा। अवर्णात् दान्ते स्थितौ यकारवकारावीषत्स्पृष्टतरौ वा स्यातां अचि परे। तयार्थ्याः त आर्य्याः पट एहि, पटवेहि इति रूपद्वयम्। ईषत्-स्पृष्टता हि उच्चारणस्थानशैथिल्यमिति (२)।

३८। एङः। एङ् प्रत्याहारः अत इति तपरकरणात् पटवा-गच्छ इत्यत्र न स्यात्। वाद्वयमध्यस्थत्वात् नित्यम्। विशेषविधा-नादयवावनेन वाध्येते।

---

(१) अचोजायेते अज्जौ। यश्च वश्च तौ य्वौ। अज्जौ च तौ य्वौ चेति तयोः। अचः स्थाने जातयोरनादिस्थयोर्य्वयोर्नित्यं लुप् स्यात् हसे परे।

(२) अत्र सूत्रे अयादीनामेकपदीयत्व एव यवयोर्लोपस्तेन पुत्र पठ य् इति, पुत्र पठ व् इति, पुत्र पठ मा य् इति, पुत्र पठ मा व् इत्यादौ माभूदिति दुर्गादासमतम्।

४०। **गोर्व्वा।** (गोः ६।, वा ।१।)।

गोरति वाऽसन्धिः। गो अग्रं गवाग्रं गोऽग्रं।

४१। **नाजोऽन्तोऽनाङ् निः प्लुश्च।**

(न ।१।, अच् ।१।, ओऽन्तः १।, अनाङ् ।१।, निः १।, प्लुः १।, च ।१।)।

४०। गोः। पूर्व्वसूत्रादत इत्यनुवर्त्त्य क्ति-विपरिणामादाह अतीति। वाशब्दस्योभयपचान्वितत्वान्निषेधपच आश्रीयतेऽत्र (१)। तथाच दान्ते स्थितस्य गोशब्दस्य अति यत्कार्य्यं प्राप्तं तन्न भवति वेत्यर्थः। तेन गो अग्रमित्यत्र वा सन्धिनिषेधः। पचे वाव गोरित्यवादेशे गवाग्रमिति, उभयत्यक्तपचे गोऽग्रमिति। वा द्वयेन रूपत्रयम्।

४१। नाजो। अजिति लुप्तप्रोक्तं दं, ओ अन्तो यस्य स ओऽन्तः, न आङ् अनाङ्, अचो विशेषणं, निरित्यस्य उभयत्रान्वयः। मण्डूकगत्या अचीति अनुवर्त्तते, तथाच अप्लुमात्रनिः ओऽन्तनिश्च अचि सन्धिं नाप्नोतीत्यर्थः। तेन जानु उ, जानू अत्र जान्वत्र, मधु उ, मधू-अत्र मध्वत्र इत्यादौ निर्गुणीभूतत्वात् सन्धिः(२)। अजोऽन्तः इत्येकदत्वे सिद्धे विभिन्नदकरणमेवं

---

(१) गो अग्रमित्युदाहृतवताचार्य्येण अकारे परे गोशब्दस्य सन्धिनिषेधोऽपि स्यादिति सूचितम्। ततश्च गोरति वा सन्धिरिति वृत्तौ सन्धिर्विभाव्यते उत वासन्धिरित्यत्र अकारप्रश्लेषेण सन्धिनिषेधो विभाव्यते इत्याशङ्कराह वा शब्दश्चेति।

(२) एषामचि परे सन्धिनिषेधात् अचः परश्चेत् सन्धिर्भविष्यतीति ध्येयमिति। का—वि।

अज्मात्र ओकारान्तश्च निराङ्वर्जः सन्धिं नाप्नोति प्लुश्च (१)।
अ-अनन्तः, इ-ईश्वरः, उ-उमेशः, अहो ईशान, कृष्ण-एहि ।
अनाङ् किं—

मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः ।
य आकारः सङित् प्रोक्तो, वाक्यस्मरणयोरङित् ॥
आत्मबोधादेकदेशादालोक्योपरतेर्हरिः ।
आ एवं तत्त्वमर्य्यादा, आ एवं तत् कृतं मया ॥

ज्ञापयति ओऽन्तनिमधिकृत्य यः सन्धिः सोऽपि न स्यात्, तेन अहो अत्र, नो अत्र इत्यादौ नाकारस्य लुप्। प्लुरित्यत्र योग-

---

(१) (मूले ओअन्त इत्यसन्धिकमङ्गीकृत्याह) ओअन्त इति पृथक्करणादच्पदेन तन्मात्रं प्रतीयते। अन्यथा व्रजवदरलजनिम इत्यादिवत् अजन्तस्यैव प्राप्तिः स्यात्। किञ्च ओ इति पृथक् पाठेनापि ओदन्तप्राप्तौ अन्तग्रहणं ओदन्तस्य अन्तावयवीयसन्धेरेव निषेधो न तु सर्व्ववर्णानामिति ज्ञापनार्थम्। अन्तावयवीयसन्धिश्च अचि पर एव सम्भवतीति अचि पर एव निषेधः। तत्साहचर्य्यात् अज्मात्रप्लुतयोरपि अचि पर एव सन्धिनिषेध इति बोध्यम्। तेन अनन्त अ ईशान अहो इत्यादौ सन्धिः स्यादेव। न च अनन्त अ इत्यादिषु अकारादेः सन्धिस्थानिवत्त्वाभावादेव सन्धिनिषेधस्य न प्रसङ्ग इति वाच्यम्, यस्य यस्य सन्धिनिषेधस्तन्निमित्तकसन्धेरपि निषेध इत्यवश्यवक्तव्यत्वात्। अन्यथा गङ्गे अत्र इत्यादावपि अकारलोपः प्रसजेत्। अत एव अवगणित-मवमतावज्ञाते अवमानितञ्च परिभूते। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरोक्तिः संगच्छते। ननु कृष्ण एहि इत्यादौ प्लुतात्परस्य सेर्लोपः कथमितिचेत् सत्यं, आदौ ह्रस्वात् सिलोपे पदसंज्ञायां पश्चाद्दूराह्वानादौ प्लुतत्वे सन्धिनिषेधः इति दुर्गादासः।

ओऽन्त इत्यत्र यद्यपि येन विधिस्तदन्तस्येति न्यायात् ओकारपदेन ओकारान्तो लभ्यते तथापि अन्तग्रहणं, अन्तावयवस्य सन्धिनिषेधार्थं नतु समुदायस्य, तेन ईशानाहो इत्यादौ सन्धिः स्यादेवेति। का—सि।

विभागः कर्त्तव्यः (१)। पूर्व्वसूत्राद्दाशब्दं प्लावनुवर्त्त्य तस्य व्यवस्थया विकल्पयन्ति, तेन कृष्ण इति कृष्णेति इतावेवेति केचित्। चकारोऽनुक्तसमुच्चयार्थः (२) यथा परे—

दूराह्वाने तु वाक्यस्य धावन्त्याच् प्लुर्विभाषया। पर्य्यायेण तयान्त्यद्वईहयोरन्त्ययोरपि। अनन्त्ययोरथादूरे भवेत् प्रत्यभिवादने। नाम्नो गोत्रस्य चैवान्त्याजस्त्रीशूद्रानसूयके। अथ पूजाप्रतिषेधानुयोगेषु (३) च वाक्यतः। इवार्थेन चिता योगे, तथा प्रश्नोत्तरे तु हेः। अथान्त्याच् धेर्द्विरुक्तस्य पर्य्यायेणैव भर्त्सने। अथ पूर्व्वस्य निन्दायामसूया सम्मति-क्रुधि। तथा विचार्य्यमाणानामधान्त्याजङ्गयोगतः। त्यादि-सापेक्षक-त्यादेराशिषि प्रेष्यनिन्दयोः। तथाथ सर्व्वदानाश्च प्रश्नाख्याने भवेदथ। पूजा-प्रश्न-विचारेषु तथा प्रत्यभिवादने। एचः प्लुतादिभागः स्यादन्त्यभागस्य युक्रवेत्। न तु हैच, इति प्राह लौकिके शाकटायनः।

वाक्यस्य मध्ये धौ अन्त्याच् प्लुःस्याद्दा दूराह्वाने सति, स्वाभाविक-प्रयत्नातिरिक्त-प्रयत्नोच्चरितत्वं दूराह्वानं तस्मिन् सति। कृष्ण३ एहि, एहि कृष्ण३, पक्षे कृष्णेहि। तथा (अन्त्यदरः) ऋद्भिन्नो रुसंज्ञको धावच् पर्य्यायेण प्लुर्वा स्यात् दूराह्वाने सति। दे३वद३त्त३ एहि, एहि देवदत्त३, पक्षे देवदत्तेहि। रु इति किं एहि सु-

---

(१) प्लुतस्य सञ्ज्ञा योगस्तस्य विभागश्च। सन्धिनिषेध सन्धिश्च भवतीत्यर्थः।

(२) अनुक्तानां समुच्चयः सम्बन्धोऽर्थो यस्य सः। अत्र अपरेऽपि केचित् नियमाः सन्तीति चकारेण सूचितमित्यर्थः।

(३) प्रतिषेधस्तिरस्कारः, अनुयोगः पृच्छा।

रथ३ अत्र अन्त्याच् पूर्व्वेण (१), सुरथेहि च। अन्टदितिकिं कृष्ण३ एहि। अन्त्ययोरनन्त्ययोश्च हैहयो(२)रच् प्लुःस्याद्वा दूराह्वाने सति। अम्ब है३ है३ अम्ब, अम्ब हे३ हे३ अम्ब, पक्षे अम्ब३है अम्ब३हे हायम्ब३ हेऽम्ब३। है हे शब्दौ सम्बोधनार्थद्योतकौ। स्त्रीशूद्रानसूयकभिन्नानां (३) प्रत्यभिवादने नाम्नो गोत्रस्य च धावन्त्याचः प्लुः स्याद्वा। अभिवादितेन गुरुणा प्रयुक्ताभिवादकस्याशीः प्रत्यभिवादनम्। आयुष्मान् भव वशिष्ठ३, आयुष्मान् भव गार्ग्य३। नामगोत्रयोरितिकिं आयुष्मान् भव वत्स। स्त्रीशूद्रादौ तु आयुष्मती भव गार्गि, आयुष्मान् भव नापित, आयुष्मान् भव जाल्म। अदूरार्थोऽयमारम्भः, दूरे तु पूर्व्वेणैव। पूजाद्यर्थेषु वाक्यानामन्त्याच् प्लुः स्याद्वा। पुनर्वाक्यग्रहणं ध्यधिसाधारणप्लुतार्थं (४) शोभनः खल्वसि मैत्र३, मैत्र भोः किमाश्चर्य्यं३, अद्य श्राद्धमित्यात्थ३, अयमप्यदूरार्थः। इवार्थचित्शब्दयोगे वाक्यानामन्त्याच् प्लुः स्याद्वा। राजाचिद्ब्रूते३ राजवद्वदतीत्यर्थः। प्रश्नोत्तरे हे रन्त्याच् प्लुः स्याद्वा। कटमकार्षं हि३ प्रश्नस्य प्रतिवचनं तत्र। भत् सनेऽर्थे धे द्विरुक्तस्यान्त्याच् पर्य्यायेण प्लुः स्याद्वा। कर्ण३ कर्ण३ अद्य क्व गम्यते, कर्ण३ अद्य क्व गम्यते। निन्दाद्यर्थेषु दे: पूर्व्वदस्यान्त्याच् प्लुः स्याद्वा अर्ज्जुन३ अर्ज्जुन धिक्

---

(१) पूर्व्वेण पूर्व्वनियमेन अन्त्याचः प्लुर्वास्यादित्यर्थः।

(२) हैहे इति शब्दयोः।

(३) अनसूयको मूढ़ः।

(४) सम्बोधनासम्बोधनसाधारणम्।

त्वामित्यादि। इदमन्यत्राप्यूहनीयम् (१)। सन्दिग्धे वस्तुनि तत्त्व-परीक्षा विचारः, तद्विषयाणां वाक्यानां पूर्व्वंदस्यान्त्याच् प्लुः स्याद्वा अहिः३ नु रज्जुः। अङ्गशब्दयोगे त्यादन्त-सापेक्ष त्याद्यन्तस्यान्त्याच् प्लुः स्याद्वा। अङ्ग क्रीड़३ पुरा वुध्यसे जाल्म। अन्यत्र अङ्ग-क्रीड़ अङ्ग कूज। आशीर्व्वादाद्यर्थेषु चानङ्गयोगेऽपि त्यादन्त-सापेक्षत्यादन्तस्यान्त्याच् प्लुः स्याद्वा। रुद्रं भज३ चिरं जीव्याः। भृत्य धान्यं लुनीहि३ अजाश्च रक्ष। स्वयं दुग्धं भुङ्क्ते३ उपाध्यायं तक्रं पाययति।

प्रश्नाख्यानयोः सर्व्वेषां दानां अन्त्याच् प्लुः स्याद्वा। अगम३ः पूर्व्वा३न् ग्रामा३न् अग्निभूते३। अगम३ पूर्व्वा३न् ग्रामा३न् भोः। पूजाद्यर्थेषु एच आदिभागस्य प्लुः स्याद्वा, अन्त्यभागस्य युत्स्याद्वा न तु इनिष्पन्नस्य एचः। शोभनः खल्वसि अग्न३इ, पूजायाम् (१)। आगच्छ३इः शैल३इ अग्निभूत३इ, प्रश्ने। होतव्यं दीक्षितस्य गृह३इ, विचारे। आयुष्मन्तौ भवतं वत्स३उ, प्रत्यभिवादने। एषु किं शोभनः खल्वसि अग्ने। दूरे तु शोभनः खल्वसि अग्ने३। इस्व एचस्तु आयुष्मत्यौ भवतं कन्ये३ इति पूर्व्वेण प्लुः न अत् युतौ। यत्र यत्र प्लुस्तत्रैव विकल्पः, यत्र यत्राचि प्लुर्व्विहितः तत्र सन्ध्यभावः, यत्रानचि तत्र प्रसङ्गादुक्तः। प्लु-प्रकरणं छान्दसमिति परे। शाकटायनस्तु भाषायामपि अतएव लिखितमस्माभिः।

---

(१) अन्यत्रापि अस्तयाद्यर्थेष्वपि, इइ-धिक् त्वामिति।

४२ । व्द्वेऽमीऽस्वे ।

(व्व-द्वे ७।, अमी ई ऊ-ए = स्वे ।१।) ।

व्वे निष्पन्नो ऽमी शब्दो, द्वे निष्पन्न ईदूदेदन्तस्य सन्धिं नाप्नोति।
अमी-ईशाः, हरी-एतौ, विष्णू-इमौ, गङ्गे-इमे ।
व्द्वे किं अम्ययं, वध्वर्थः ।

मर्य्यादायामित्यादि । मर्य्यादा सीमा, अभिविधिरभिव्याप्तिः, क्रियायोगो धातुना सह सम्बन्धः, ईषदर्थोऽल्पार्थः, क्रमेणोदाहरति आत्मबोधादिति । आ आत्मबोधात् आत्मज्ञानपर्य्यन्तं आ एकदेशात् एकदेशं व्याप्य हरिः आलोकि सम्यक्प्रकारेण दृष्टः । आ उपरतैरीषद्विरक्तैर्जनैरित्यर्थः । अङ्ङिदुदाहरति आ एवमिति । मर्य्यादा महिमा, आ इति वाक्यं, तत्त्वस्य तवान्तःकरणस्य एवं एतादृशी मर्य्यादा, अर्थात् मया यदुक्तं तत् त्वया न कृतं इति भावः ; तत्त्वं ब्रह्मणि तद्भावे वाक्यभेदे च चेतसीति धरणिः । आ एवं भवता एतादृक् कथमुच्यते त्वद्वाक्यान्मया यदङ्गीकृतं तत्कृतमेवेति पूर्व्ववाक्यानन्तरं स्मरणं, उभयत्र न सन्धिः ।

४२ । व्द्वे । व्वश्च द्वश्च तत् तस्मिन् । अमी इति लुप्तप्रोक्तान्तं दं, स्वे इति लुप्तप्रोक्तं दं, ईश्च ऊश्च एश्च ते । भिन्नदाभ्यां व्द्वयोः क्रमेणोदाहरति अमी ईशा इत्यादि । गङ्गे इमे इति । द्व-निष्पन्नस्य एकारस्य निषेधात् पचेते इमौ इत्यादौ न स्यात् । पचेते अत्र इत्यादौ तन्निमित्तत्वान्नाकारलुप् । अचीत्यनुवर्त्तते, तेन कामवाचकात् इ शब्दात् औ ई, इधि ई इधी इति स्यादेव,

४३। स्योदिती।

(सि श्रोत् = स्योत् ।१।, वा ।१।, इतौ ।७।)।

सौ जात श्रोकारः सन्धिं वा नाप्नोति इतौ परे।

विष्णो-इति विष्ण-इति विष्णविति।

एवं मधु ऊ मधू। नञा निर्द्दिष्टस्यानित्यत्वं तेन अमुकेऽत्र, अतएव अदसो मात् पर ईदूदेत् सन्धिर्न स्यात्, अके तु अत्र स्यादिति परे, हे सन्ध्येऽस्तमनोदये, मणीवादयश्च सिद्धाः। मणी आदीनामिवे एव नान्यत्र तेन मणी अत्र मणी इति। मणी आदयस्तु—मणी भार्य्यापती चैव जायापती च जम्पती। वाससी रोदसी चैव पेचुषी दम्पती तथा इति। यद्यपि कादम्ब-खण्डितदलानि व पङ्कजानि, प्रशस्तलिखितानि व केशिदन्त-चतानि, शालवं व यशः पपुरित्यादौ इवार्थोऽपि वशब्दोऽस्ति, तथापि इवे अनिष्टवारणार्थमिदम्। अम्ययमिति अमधोर्भावे घञ् स्वपचे (१) अमो रोगः अस्यास्ति असौ अमी। बध्वर्थ इति बध्वा अर्थं इति वाक्यम्।

४३। स्योत्। सौजात श्रोत् स्योत् शाकपार्थिवादि-त्वान्मध्यपदलोपः। विष्णो इति। सन्ध्यभावपचे श्रोरवादेशे अयामित्यादिना वा लुप्, लुवभावपचे विष्णविति। सौजात इत्युक्तेः गवित्यत्र अनुकरणे माभूत्।

---

(१) जनबध इत्यादिना लुप्तपचे।

४४ । उञ् णपात्त्वचि व वा ।

(उञ् ।१।, णपात् ५।, तु ।१।, अचि ७।, व ।१।, वा ।१।) ।
उञ् सन्धिं वा नाप्नोति इतौ परे, णपात् परस्तु वो वा स्यादचि ।
उ-इति, विति । किम्वुक्तं किमु उक्तम् ।

४५ । वेक् स्वश्चार्णेऽसे ।

(वा ।१।, इक् ।१।, स्वः १।, च ।१।, अर्णे ७।, असे ७।) ।
इक् सन्धिं वा नाप्नोति, स्वश्च वा स्यादर्णे परे, नतु से, दान्ते ।
शार्ङ्गी-अत्र शार्ङ्गि-अत्र शार्ङ्ग्यत्र । असे किं—हर्य्यर्चा ।

---

४४ । उञ । उञिनः प्रश्नार्थः । इतावित्यनुवर्त्तते अत आह इतौ परे इति । णप् प्रत्याहारः तस्मादुञो वोऽचि वेत्यर्थः । उ इतीति पूर्व्वेण नित्यं निषेधे प्राप्ते विकल्पः । पक्षे विति । किम्वुक्तमिति सन्निपातलक्षणस्य विधेरनिमित्तत्वान्नुः । रूपान्तरत्वात् शुभंयुमाचक्षाणः शुभंय् उ, शुभंयु इति शुभंय्विति इति तु पूर्व्वभागे न । णपात्सानुनासिको व-इत्यन्यः । किमु उक्तमिति व-विधानाभावपक्षे नाजोऽन्त इति सन्धिनिषेधः, उपदेशावस्थायां केवलाचो ग्रहणात् । वाशब्दव्यवस्थया इतौ उञः सानुनासिको घादेशः तेन ऊँ इति इत्यपि ।

४५ । वेक् । इक् प्रत्याहारः । न र्णः अर्णस्तस्मिन् । शार्ङ्गि अत्र इति स्वविधानसामर्थ्यान्न यः । वाशब्दस्य व्यवस्थावाचित्वात् अदान्तेऽपि क्वचित्, यथा—अरी अर्त्तिं, अरि अर्त्तिं,

४६। ऋत्यक्। (ऋति ७।, अक्।१।)।

अक् सन्धिं वा नाप्नोति ऋति परे ह्रस्व वा स्यात्।

ब्रह्मा-ऋषिः, ब्रह्म-ऋषिः, ब्रह्मर्षिः।

इति अच्-सन्धिपादः।

अर्थवृत्तिं इत्यादि। हर्य्यर्चेति हरेरर्चा इति वाक्यं, इदन्तु (१) भाष्यमते। परे तु नित्यसवर्ज्जनात् नद्या अभ इत्यर्थे नदी अभः, नदि अभः, नद्यभ इति। नित्यसे तु नद्यर्थमिति स्यादेव।

४६। ऋति। ऋगकौ प्रत्याहारौ। अचास इति नानुवर्त्तते, तेन महांयासाहृषियेति महाऋषि, महऋषि, महर्षिरिति। तथाच उच्चारित-रुचिर-ऋचां चाननानां चतुर्णामिति सूर्य्यशतके। अत्रापि नित्यसवर्ज्जनात् अभ्रच्छी इत्यादि उदाहरन्ति केचित्। वा शब्दस्य व्यवस्थावाचित्वात् गैः पराच्छतीत्यादौ न स्यात्। अत्र केचिदाहुः—"ऋतोरलाहृद्लृतोर्व्वा लोपस्ताभ्याम् चेच" । ऋकारस्य ऋकारे परे रः लृकारे परे लः स्याद्वा, ऋतो लोपश्च वा ऋद्लृतोः परयोः, रलाभ्यां परयो ऋद्लृतोश्च। पितृर्णं, पितृणं, पितॄणं पक्षे पितृऋणं, पितृणम्। होतॄकारः, होतृलृकारः, होतॄकारः पक्षे होतृलृकारः, होतृकारः इति। परे तु, ऋत ऋद्लृताहृद्लृद्भ्यां

---

(१) समासमात्रवर्जमन्तु।

वा ऋता तु ऌट् ऌतः। ऋकारस्य ऋकारेण सह रेफभागद्वययुक्त ऋत्, ऋकारस्य ऌकारेण सह लभागद्वययुक्त ऌत् वा स्यात्, ऌकारस्य तु ऋकारेण सह लभागद्वययुक्त ऌच्च वा। होतृ ऋकारः, होतृ ऌकारः इत्यत्र होत्ऋकारः, होत्ऌकारः। गम्ऌ ऋकार इत्यत्र गम्ऌकारः पक्षे यथा प्राप्तम्। अस्मन्मते तु वा शब्दस्य बाहुल्यात् ऋकि ऋकौ घं-सन्ध्यभाव-स्वाः प्रवर्त्तन्ते। तथाहि पितॄणं, पितृऋणं, पितृणम्। प्राग्टकौ घंभावात् "सहर्णार्घं"इति घें कृतेऽपि वा स्वः। स रेफभागद्वययुक्तः। ऋकारे त्रयोऽज्भागाः सन्ति तन्मध्यवर्त्ती तुरीयोरेफः। इकारभागः पूर्व्वार्द्धे उपर्य्यध उवर्णभाक्। पूर्व्वार्द्धभागवर्णांशो रेफस्तन्मध्यसंस्थित इति शिक्षाकारवचनात् ऋकारद्वयादेशे घंस्य स्वत्वे रेफभागद्वयासिद्धेः तेन पितॄणं इति (१)। क्वचिदपवादविषयेप्युत्सर्गोऽपि निविशते इति न्यायात् यलायवायाव इति रलौ तेन पित्रृणं, पित्रृकारः, गम्लृकारः।

इकोयलन् वार्णेऽचि। इकः क्रमात् यलन् वा स्यात् अर्णे अचि परे। अनावितौ। दधियत्र, मधुवत्र, कर्त्तृरत्र, शक्लृलत्र। एवं सेऽपि। त्रियम्बकः, भूवादय इत्यादि, पक्षे दधि अत्र दध्यत्र इत्यादि। अर्णे किं दधीदम्। अचि किं–दधि तिष्ठति।

---

(१) स रेफभागद्वययुक्त इत्यारभ्य तेन पितॄणमित्यन्तस्य टीकांशस्य टिप्पनी परिशिष्टे द्रष्टव्या।

हस्-सन्धिः।

४७। स्तु श्चुभिः श्च्वशात्।

(स्तु ।१।, श्चुभिः ३।।।, श्चु ।२।, अशात् ५।)।

सकारतवर्गौ शकारेण चवर्गेण वा योगे शकारचवर्गौ क्रमात् प्राप्नुतः, न तु शात् परौ। सच्चित्, शार्ङ्गिञ्जय। अशात् किं प्रश्नः।

४८। ष्टुभिः ष्ट्वप्यदान्तटोः।

(ष्टुभिः ३।।।, ष्टु ।२।, अपि ७।, अदान्तटोः ५।)।

४७। स्तु श्चुभिः। स च तुश्च तत्, श च चवश्च ते श्चवः तैः, अवयवापेक्षया ब्वं, यथा—अचः अचामिति. श च चुश्च तत्। द्वविषये श्वनिर्द्देशात् (१) नञ् तत्पुरुषः, लञ्ज् धातुः, अच् तकार इत्यादौ न स्यात्। एके तु अध्यच्ताच्चेप्पिरिति ज्ञापकात् दान्तचोः परस्य स्तोश्चुत्वं न स्यादित्याहुः। अच्श्च नञ्श्च इत्यादौ चजाभ्यां सस्य श इति केचित् (२)। सस्य शत्वं यथा कृष्णश्चिन्त्य इत्यादौ। दान्तादान्तसाधारणोऽस्य विषयः, अतएवादान्ते प्रत्युदाहरति प्रश्न इति। प्रच्छ धीः स्वपच्चेत्यादिना नङ्, न जिस, छ्वोः शूटाविति छस्य शः।

---

(१) चुभ्यामितिकर्त्तव्ये श्चुभिरितिकरणात्।

(२) 'अत्र अच्श्चिरिति अध्यच्ताच्चेप्पिरित्यादिज्ञापकात् विभक्त्यन्तचवर्गान्तात् परौ सकारतवर्गौ शकारचवर्गौ न स्यातामिति बोध्यम्, ज्ञापकज्ञापितविधयो लक्ष्यमनुसरन्तीति न्यायात्। तेन नञ्समासः लञ्जधातुरित्यादयः सिद्धाः। किन्तु अच्श्च नञ्श्च इत्यादौ उभयोः परयोश्चवर्गस्य दान्तत्वेऽपि विभक्त्यन्तत्वाभावात् श्चुः सस्य तालव्यशकारत्वम्"—इति दुर्गादासः।

सकारतवर्गौ षकारेण टवर्गेण वा योगे षकारटवर्गौ क्रमात् प्राप्नुतः, न तु षकारे परे, न च दान्तात् टवर्गात् परौ।

तट्टीका, चक्रिण्ढौकसे। अपि किं सत् षष्ठः। अदान्तटोः किं षट्-ते।

४९। **षण्णां षण्णवति षण्णगर्य्यः।** (१।।।)।

एते निपात्यन्ते।

५०। **ले लस्तोः।** (ले ७।, लः १।, तोः ६।)।

ले परे तो लंकारः स्यात्। तल्लयः, विद्वाँल्लिखति।

४८। ष्टुभिः। ष्टुभिरिति पूर्व्ववत्। ष च टुश्च तत्, न ष अष तस्मिन्, दस्यान्तो दान्तः स चासौ टुश्चेति सः, न सः अदान्तटु-स्तस्मात्। तथाच दान्तटवर्गात् उच्चार्य्यमाणौ सकारतवर्गा-वित्यर्थः। तेन षट्सन्त इत्यत्र तनि कृते अदान्तत्वेऽपि प्राग्दान्त-परत्वान्न ष्टुत्वमिति। त्वनिर्द्देशान्न यथासङ्ख्यम्। स्तु इत्यनु-वर्त्तयन्नाह सकारतवर्गाविति। अस्यापि दान्तादान्तयोर्व्विषयः।

४९। षण्णाम्। षण्णाञ्च षण्णवतिश्च षण्णगरी (१) च ताः। अनुकरणात् न तोर्लुक्। षण्णामिति नुमि डे प्राप्ते णौ निपात्यते। नवतिनगर्य्योर्दान्तटोः परत्वादप्राप्ते णत्वं निपात्यते। नगरीति स्त्रीलिङ्गनिर्द्देशात् षड्नगरमित्यत्र न स्यात्।

५०। ले। तल्लय इति। लीयत इति भावे अल्; तस्य लय इति वाक्यम्। यद्वा लीयते अस्मिन् लयः, स लयो यस्येति

---

(१) षण्णां नगरीति दुर्गादासः, षण्णां नगराणां समाहार इति गोयीचन्द्रः।

यलो द्विधारो निरनुनासिकः सानुनासिकः।
ञमोऽनुनासिक स्तेन तत्स्थाने सानुनासिकः॥

५१। म्नो नुं झंस्यदान्ते।

(म्नोः ६॥, नुः १।, झसि ७।, अदान्ते ७।)।

अदान्ते स्थितयो र्मनयो र्नुः स्यात् झसि परे। रंस्यते, वृंहितं।

विग्रहः। ननु यलस्य सानुनासिकत्वं कुत इत्यत आह यलो द्विधेत्यादि। नास्ति रो यस्मिन् सोऽर', यल इत्यस्य विशेषणं। तथाच रभिन्नयलो द्विधा द्विप्रकारः, एको निरनुनासिकः अनुनासिकत्वधर्मरहितः, (१) अपरः सानुनासिकः अनुनासिकत्वधर्मसहितः। तथाच शिक्षाकाराः—अन्तस्था यरलवा ईषत्स्पृष्टा, रेफवर्ज्जिताः द्विप्रभेदाः सानुनासिका निरनुनासिकाश्च इत्याहुः। ञम इति, ञमः प्रत्याहारः। अनुनासिक इति अनु पश्चात् नासिकया उच्चार्य्यते यः सोऽनुनासिकः। ञमस्तु अनुनासिकएव तेन हेतुना तत्स्थाने य आदेशः सः सानुनासिकः स्यात्, न निरनुनासिक इत्यर्थः। विद्वाँल्लिखति इत्यादौ सानुनासिको लकारः। एवं यँय्यम्यते सँव्वत्सर इत्यादि।

५१। म्नोः। म च न च तौ तयोः। न दान्तोऽदान्तस्तस्मिन्। रंस्यते इति रम धोः स्यते। वृंहितमपि हृहि हृद्धौ क्त, इदित्त्वान्नुन्, अनेन नस्य नुः।

---

(१) निराकुल इतिवदत्र अनुनासिकपदस्य धर्मपरतया निर्द्देशः।

सकारतवर्गौ षकारेण टवर्गेण वा योगे षकारटवर्गौ क्रमात् प्राप्नुतः, न तु षकारे परे, न च दान्तात् टवर्गात् परौ।

तट्टीका, चक्रिण्ढौकसे। अपि किं सत् षष्ठः। अदान्तटोः किं षट्-ते।

४९। **षसां षसवति षसगर्य्यः।** (१॥)।

एते निपात्यन्ते।

५०। **ले लस्तोः।** (ले ७।, लः १।, तोः ६।)।

ले परे तो लकारः स्यात्। तल्लयः, विद्वाँल्लिखति।

४८। ष्टुभिः। ष्टुभिरिति पूर्व्ववत्। ष च टुश्च तत्, न ष अष तस्मिन्, दस्यान्तो दान्तः स चासौ टुश्चेति सः, न सः अदान्तटुस्तस्मात्। तथाच दान्तटवर्गात् उच्चार्य्यमाणौ सकारतवर्गावित्यर्थः। तेन षट्सन्त इत्यत्र तनि कृते अदान्तत्वेऽपि प्रागदान्तपरत्वान्न ष्टुत्वमिति। द्वनिर्द्देशान्न यथासङ्ख्यम्। स्तु इत्यनुवर्त्तयन्नाह सकारतवर्गाविति। अस्यापि दान्तादान्तयोर्व्विषयः।

४९। षसाम्। षसाश्च षसवतिश्च षसगरी (१) च ताः। अनुकरणात् न त्रोर्लुक्। षसामिति नुमि ङे प्राप्ते णो निपात्यते। नवतिनगर्य्योर्दान्तटोः परत्वादप्राप्ते णत्वं निपात्यते। नगरीति स्त्रीलिङ्गनिर्द्देशात् षड्नगरमित्यत्र न स्यात्।

५०। ले। तल्लय इति। लीयत इति भावे अल्; तस्य लय इति वाक्यम्। यद्वा लीयते अस्मिन् लयः, स लयो यस्येति

---

(१) षसां नगरीति दुर्गादासः, षसां नगराणां समाहार इति गोयीचन्द्रः।

यलो द्विधारो निरनुनासिकः सानुनासिकः ।
जमोऽनुनासिक स्तेन तत्स्थाने सानुनासिकः ॥

५१ । म्नो नुँ झंस्यदान्ते ।

(म्नोः ६॥, नुः १।, झसि ७।, अदान्ते ७।) ।

अदान्ते स्थितयो र्मनयो र्नुः स्यात् झसि परे। रंस्यते, वृंहितं।

विग्रहः । ननु यलस्य सानुनासिकत्वं कुत इत्यत आह यलो द्विधेत्यादि । नास्ति रो यस्मिन् सोऽरः, यल इत्यस्य विशेषणं । तथाच रभिन्नयलो द्विधा द्विप्रकारः, एको निरनुनासिकः अनुनासिकत्वधर्म्मरहितः, (१) अपरः सानुनासिकः अनुनासिकत्वधर्म्मसहितः । तथाच शिक्षाकाराः—अन्तस्था यरलवा ईषत्स्पृष्टा, रेफवर्ज्जिताः द्विप्रभेदाः सानुनासिका निरनुनासिकाश्च इत्याहुः । जम इति, जमः प्रत्याहारः । अनुनासिक इति अनु पश्चात् नासिकया उच्चार्य्यते यः सोऽनुनासिकः । जमस्तु अनुनासिकएव तेन हेतुना तत्स्थाने य आदेशः सः सानुनासिकः स्यात्, न निरनुनासिक इत्यर्थः । विद्वाँल्लिखति इत्यादौ सानुनासिको लकारः । एवं यँय्यम्यते सँव्वत्सर इत्यादि ।

५१ । म्नोः । म च न च तौ तयोः । न दान्तोऽदान्तस्तस्मिन् । रंस्यते इति रम धोः स्यते । वृंहितमपि हृंहि हद्धौ क्त, इदित्वान्नुन्, अनेन नस्य नुः ।

---

(१) निराकुल इतिवदत्र अनुनासिकशब्दस्य धर्म्मपरतया निर्द्देशः ।

५२ । ञपे ञम् नो ।: (ञपे ७।, ञम् ।१।, नो: ६।) ।

अदान्ते स्थितस्य नो ञपे परे ञम् स्यात् । शान्तः, अङ्कितः ।

५३ । वा त्वरयपेऽरयम् ।

(वा ।१।, तु ।१।, अरयपि ७।, अरयम् ।१।) ।

दान्ते अदान्ते वा स्थितस्य नो रेफवर्जयपे परे रेफवर्जयम् वा स्यात् । यमो ऽनुनासिकः । यँय्यम्यते यंयम्यते, हरिम्भज हरिंभज । कम्मते इति पूर्व्वेण नित्यम् । अरे किं—रंरम्यते ।

---

५२ । ञपे । ञप्ञमौ प्रत्याहारौ । शान्त इति शम् धोः क्तः ञमुञोझास्यणाविति घः, पश्चात् पूर्व्वेण नौ कृते अनेन नः । अङ्कित इति अकिक् लक्ष्मणि (१) क्तः, इम्, नुण्, पश्चात् पूर्व्वेण नौ कृते अनेन ङः । अत्र पूर्व्वसूत्रात् म्नोरित्यनुवर्त्त्य तन्नोरेव ङम् तेन जंजप्यते इत्यादौ न नित्यं, किन्तु परसूत्रेण विकल्पः (२) झपीति कृते सिद्धे ञप इति करणात् इन्दांचकार इत्यादौ आमो नो नं नित्यं ञम्, गौरवादर्थाधिक्यमिति ।

५३ । वा त्व । नास्ति रो यस्मिन् सोऽरः, अरश्चासौ यपश्चेति स तस्मिन् । एवं अरश्चासौ यम् चेति सः । यप्यमौ प्रत्याहारौ । अदान्त इत्यनुवर्त्तते, सिंहावलोकितन्यायेन दान्त इत्यपि ; अत आह दान्तेऽदान्ते इति । यँय्यम्यते इति यमधो यैङ् ञमजपेत्यादिना नुण् । इह सामान्यनोर्ग्रहणात् यम् ।

---

(१) लक्ष्म चिह्नयुक्तकरणमिति दुर्गादासः ।

(२) जंजप्यते इत्यादौ ञमजपेत्यादिना अनुस्वारागमेन तस्य म्नोः स्थानजातत्वाभावान्न नित्यमित्यर्थः ।

५४ । दान्ते मो ऽसम्राजो ह्से नुः ।

(दान्ते ७।, मः ६।, असम्राजः ६।, ह्से ७।, नुः १।) ।

दान्ते स्थितस्य मस्य ह्से परे नुः स्यात्, न तु सम्राजः ।

शिवंस्तौति । असम्राजः किं—सम्राड़िति ।

एवं वँव्वम्यते वंवम्यते, लँल्लम्यते, लंलम्यते इत्यदान्ते । दान्ते तु सँय्यन्ता, संयन्ता:, सँव्वत्सरः, संवत्सरः, सँल्लयः, संलय इत्यादि । कम्पत इति कपि ङ चलने, ते, इदित्त्वान्नुण्, स्नो र्नुरिति नौ कृते अपि जम् इति । वाशब्दस्य व्यवस्थावाचित्वात् हकारस्य व्यवधानेऽरयपेऽरयम्, तेन किँय्ह्यः, किंह्यः, किँव्ह्वलयति किंह्वलयति, किँल्ह्लादयति किंह्लादयति, किन्ह्नुते, किंह्नुते, किम्ह्मलयति, किंह्मलयति (१) । अर इति किं—किं ह्रादयति ।

५४ । दान्ते । दस्यान्तोदान्तस्तस्मिन् । न सम्राट् असम्राट् तस्य । क्विबन्तनिर्देशात् संराजते इत्यादौ न स्यात् (२) । "वा विरामे" इत्यन्यः । रामं, रामम् । दान्ते किं गम्यते । ह्से किं ? अहमत्र ।

---

(१) "ममयवला: परभूता यस्मिन् तस्मिन् हकारे परे पदान्ते मकारस्य स्थाने यथाक्रमं ममयवला वा भवन्ति । यवला: सानुनासिका निरनुनासिकाश्च भवन्ति, इह तु सानुनासिकानामेव विधानम् । ह्नुते इति ह्नुङ् अपनयने । ह्मल ह्मल सञ्चलने घटादिः । ह्य इत्यव्ययं गतदिनमभिधत्ते । ह्लादी सुखे च" इति गोयीचन्द्रः ।

(२) इति शब्देन सम्राट् शब्दो यस्मिन्नर्थे रूढ तत्रैव वर्जनमिति बोध्यते । हरिस्तु—येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राड़ित्यमरोक्ते । तेन सं सोमभं राजते संराट् चन्द्र इत्यत्र स्यादेवेति दुर्गादासः ।

५५ । पुंसः सन् खप्यम्परेऽख्ये ।

(पुंसः ६।, सन् ।१।, खपि ७।, अम्परे ७।, अख्ये ७।) ।

पुंसो मस्य सन् स्यात्, अम्परे खपि परे, न तु ख्ये ।

पुंस्कोकिलः । अम्परे किं—पुंच्चीरम् । अख्ये किं—पुंख्यातः ।

---

५५ । पुंसः । अम् प्रत्याहारः । अम् परो यस्मात् स तस्मिन् । न ख्योऽख्यस्तस्मिन्, खपीत्यस्य विशेषणम् । पुंस्कोकिल इति पुमांश्चासौ कोकिलश्चेति इति वाक्यं । विधानसामर्थ्यात् न पुनः स्यान्तलुक् । एवं पुंस्करोति पुमितिपदं करोतीति वाक्यम् । पुंस्पानमित्यादि । पुंच्चीरमिति पुंसः चीरमिति वाक्यम् । पुंख्यात इति पुंसा ख्यात इति वाक्यम् । सन्यनुनासिको नोर्वा समस्तु सुमि सन्नपि । नो रनुनासिको वा स्यात् सनि, सुमि तु समः सन्च वा स्यात् ।

सकतानां (१) क्रमाद्दित्वे सर्व्वेषाञ्च (२) द्वयोर्द्वयोः ।
अनुस्वारे भवन्त्यष्टावष्ट स्युरनुनासिके ।
मते षोड़श वा ज्ञेयाः कज्जट-श्रुतिपालयोः ॥ (३)

संस्कर्ता संस्कर्ता संस्कर्त्ता संस्स्कर्ता संस्सकर्त्ता संस्क्कर्त्ता संस्कर्त्ता संस्स्कर्ता । सँस्स्कर्ता सँस्कर्ता सँस्कर्त्ता सँस्स्कर्ता सँस्सकर्त्ता सँस्क्कर्त्ता सँस्कर्त्ता सँस्स्कर्ता । कज्जटश्रुतिपालयो

---

(१) स क त एषां वर्णानां ।

(२) सर्व्वेषां सकतानां ।

(३) कज्जटश्रुतिपालयोस्तदाख्य-वैयाकरणविशेषयोः ।

५६। नो ऽप्रशामन्छते।

(नः ६।, अप्रशामः ६।, छते ७।)।

दान्ते स्थितस्य नस्य सन् स्यात्, अम्परे छते परे, न तु प्रशामः। शार्ङ्गिंश्छिन्धि, चक्रिंस्त्राहि। अम्परे किं सन्त्सरुः। अप्रशामः किं—प्रशान्तनोति।

५७। कांस्कान् नॄः पि वा।

(कांस्कान् ।१।, नॄः ।१।, पि ७।, वा ।१।)।

कांस्कान् कान्कान्, नॄः पाहि नॄन्पाहि।

मतभेदात् षोड़शरूपाणि (१)। केचित् सनि मलोपे चत्वारि यथा—सस्कर्ता सस्कर्ता ससस्कर्ता सस्कर्ता इत्याहुः।

५६। नो। न प्रशान् अप्रशान् तस्य। शार्ङ्गिंश्छिन्धि इति, छिदधोर्हि अण्, नणो न, हेर्धिः, सनि वानुनासिकः शार्ङ्गिँ-श्छिन्धि इत्यपि। चक्रिंस्त्राहि इति त्रायते इति त्राः, त्रा इव आचरेति क्वि, हि, त्राहि। अन्ये तु त्राधुरदादिरप्यस्ति इत्याहुः। सानुनासिके चक्रिँस्त्राहि इत्यपि॥

५७। कां। कानिति द्वीब्बान्तस्य कानिति द्वीब्बान्ते, नॄन् इत्यस्य पकारे सन् वा स्यात्। कांस्कानिति। सानुनासिके काँस्कान्। सनभावपक्षे कान् कान् वीप्सार्थे द्विः। नॄनित्यस्य

---

(१) "द्वि सकारमेक सकारं त्रि-सकारं रूपत्रयं सानुस्वार सानुनासिकभेदात् षट्प्रकारं, तदेव द्विककारभेदात् द्वादशप्रकारमेतदेव भाष्ये दर्शितम्" इति बोदे-चन्द्र॰।

५८। न ण टन ङ श्चकन् श शस् स शसि वा।

(न ण टन ङः ६।, चकन् ।१।, श शस् स शसि ७।, वा ।१।)।

दान्ते स्थितस्य नस्य चन् शे, णस्य टन् शसि, टनयो स्तन् से, ङस्य कन् शसि, स्याद्वा। सञ्छम्भुः सञ्च्शम्भुः सञ्शम्भुः, सुगण्ट्षष्ठः सुगण्षष्ठः, षट्त्सन्तः षट्सन्तः, सन्त्सः सन्सः, प्राङ्क्षष्ठः प्राङ्षष्ठः।

५९। चपोऽबे जब्। (चपः ६।, अबे ७।, जब् ।१।)।

दान्ते स्थितस्य चपस्य जब् स्यात् अबे परे। वागीशः, चिद्रूपः।

पकारे पञ्चधा—नॄः पाहि नॄँः पाहि नॄंस्पाहि। सर्व्वत्र निपातनात् सन् विश्व। पक्षे नॄन् पाहि नॄँस्पाहि इति परे॥

५८। टश्च नश्च तत्, नश्च णश्च टनञ्च ङश्च तत्, तस्य। एष्वकार उच्चारणार्थः। चकः प्रत्याहारस्तस्मान्नमितं करोति, तेन चकन्, तथाच चकोपस्थितचतुर्णां न इत्यर्थः, अतएव यथाक्रमं दर्शयति दान्ते स्थितस्येति। सञ्छम्भुरित्यादि—नस्य चनि कृते आगमो यद्भक्त स्तद्ग्रहणेन गृह्यते (१) इति न्यायात् नस्यादान्तत्वे म्नोर्नुरिति नुः, पश्चात् जपे जम्, शह्रोश्चपादिति वा छ। चनभावपक्षे सञ् शम्भुः। सुगण्ट्षष्ठ इति शसः प्रत्याहारत्वज्ञापनार्थं मूर्द्धन्येनोदाहृतम्। एवं टनि वा छत्वे सुगण्ट्छम्भुः सुगण्ट्शम्भुरिति, एवं सुगण्ट्साधुरिति। प्राङ्क्षष्ठ इत्यादि॥

---

(१) यद्भक्तो यस्य स्थानजातः। तद्ग्रहणेन गृह्यते तद्वद् ज्ञायते इत्यर्थः। अत्र दुर्गादासः—न ण ट न ङ इत्यस्य पञ्चम्यन्तत्वे चकि कृतेऽपीष्टसिद्धौ षष्ठ्यन्तस्य चकन् विधानं तद्भक्तत्वेन चनादीनां पदान्तत्वार्थमित्याह।

६०। **जमे जम् वा।** (जमे ७।, जम् ।१।, वा ।१।)।

दान्ते स्थितस्य चपस्य जमे परे जम् वा स्यात्। एतन्मुकुन्दः एतद्मुकुन्दः।

६१। **त्ये।** (७।)।

त्ये मे परे दान्ते स्थितस्य चपस्य जम् स्यान्नित्यम्। चिन्मयं, वाङ्मयम्।

५९। चपो। चप्जबौ प्रत्याहारौ। परबकारेणावमत्याहारं ज्ञापयन्नाह चिद्रूप इति।

६०। जमे। पूर्व्वसूत्राच्चप इत्यनुवर्त्तते। अत्र यद्यपि अन्ते चप्जबाविति विधानात् (१) वाकारं विनैव एतद्मुकुन्द इति सिध्यति (२) तथापि वाशब्द एवं ज्ञापयति विरामाभावे दान्ते झपश्चप् एव, विरामे चप्जबाविति, तेन (३) परसूत्रस्य सार्थकत्वमिति। एतन्मुकुन्द इति।

६१। त्ये। दान्तस्थितस्य चपस्य नित्यं जम् स्यादित्यर्थः। त्ये अणनङाभावादाह त्ये म इति। चिदात्मकमित्यर्थे मयट्।

---

(१) चप्जबाविति विधानात् वक्ष्यमाण झप्झभोरिति सूत्रे इति शेषः।

(२) इति सिध्यति—एतद्मुकुन्द इत्यत्र एष चासौ मुकुन्दश्चेति समासे लुप्तविभक्तिकत्वेन दान्तत्वे सिद्धे विरामपरतया झभो अवि कृते दकारो भवत्येवेत्याशङ्क्याह तथापीति। एतद्मुकुन्द इत्यत्र तु दान्तत्वेऽपि विरामाभावात् न झप्झभोरित्यनेन जब्।

(३) तेन अत्र सूत्रे विकल्पविधानेन। अन्यथा चिद्मयमित्यनिष्टं स्यात्।

६२ । शह्योश्चपात् वामि छझभौ ।

(शह्योः ६॥, चपात् ५।, वा ।१।, अमि ७।, छ-झभौ १॥) ।

दान्ते स्थितात् चपात् परयोः श-हकारयोः क्रमेणामि परे छ-झभौ वा स्तः । तच्छिवः तच्शिवः वाग्घरिः वाग्हरिः । अमि किं—वाक्श्च्योतति ।

६३ । स्वाण्ङोऽचि द्विः ।

(स्वात् ५।, ण्ङः १।, अचि ७।, द्विः १।) ।

स्वात् परो दान्ते स्थितो ण्ङो द्विः स्यादचि परे ।

सुगण्णीशः सन्नच्युतः प्रत्यङ्ङात्मा ।

---

६२ । शह्योः । शच हच तौ तयोः, छच झभ् च तौ, अम् प्रत्याहारस्तस्मिन् । तच्छिव इति स चासौ शिवश्चेति वाक्यं, पक्षे तच्शिवः । एवं वाक्छ्लक्ष्णः वाक्श्लक्ष्णः वाक्छ्मशानं वाक्श्मशानं ; अनयोः परयोः शस्य नेच्छन्ति चान्द्राः (१) । वाग्घरिरिति, एषां यो येन इति नियमात् प्राक् समो झभ् पश्चात् चपो जब् । त्रिष्टुब्भसति त्रिष्टुब्हसति इत्यादि ।

६३ । स्वात् । ण्ङ प्रत्याहारः । सुगण्णीश इति सुगणयति इति क्विप्, पश्चादनेन द्विः । स्वादिति किं—महानयं, प्राङास्ते । सनयङन्तो द्विरिति निर्द्देशात् त्य-ण्ङो द्विर्न स्यात्, तेन सनन्तान्न सनिष्यते इति भट्टवार्त्तिकम् । सन्निच्छायामिति निर्द्देशाच्च सूत्र-

---

(१) अनयोः लकारमकारयोः शस्य छत्वमिति शेषः, तथाच "लम्परस्य नेति कातन्त्रम्" इति संक्षिप्तसारसूत्रम्

६४ । छोऽचः । (छः ११, अचः ५।) ।

अचः परश्छकारो द्विः स्यात् ।

छत्तं विकल्पयति । नञोऽनाविति निर्द्देशात् अनो न द्विः तेनानन्तः अनेक इत्यादि (१) ।

६४ । छो । अच् प्रत्याहारस्तस्मात् । दान्त इति नानुवर्त्तते । मण्डूकगत्या शद्दोषपादित्यादिना वानुवर्त्त्य तस्य व्यवस्थाथाचित्वात्—

परस्परानपेक्षायां दान्तात् सदाथ वा भवेत् (२) ।
अमाङऽस्त्वात्तथा विश्वजनादेर्येति कीर्त्तितम् ॥

यथा—तिष्ठतु कुमारी च्छत्रं हर देवदत्तेत्यादि (३) नित्यम् । माङ्वर्ज्जिताभ्यां धेप्सुभ्यां विकल्पः । गौरीच्छाया गौरीछाया, कृष्ण३च्छिन्धि कृष्ण३छिन्धि । माङस्तु माच्छादयति । दान्तादिति किं म्लेच्छयति, पूर्व्वेण नित्यम् । विश्वजनच्छत्रं विश्वजनछत्रं, दधिच्छाया दधिछाया इत्यादि छान्दसमित्यन्ये (४) ।

---

(१) "अत्र अनडुद्धरोऽणाणौ धिध्योरिति, घञनन्दिपचादे र्णिननाणू घे इति, अनुयङन्तोर्द्विरित्यादिज्ञापकादसमासेऽस्य विषयो बोध्यः । तेन सनन्त यङन्त तिङन्ताः सिद्धाः । अविद्धपास्ते' सत्यादि इत्यादौ तु ज्ञापकसिद्धस्यानित्यत्वात्"—का सि ।

(२) परस्परापेक्षा यत्र नास्ति तत्रापि पदान्तदीर्घादुत्तरश्छो नित्यं द्विर्भवति इत्येके । अत्रानेकाचार्य्याणामसम्मतिरेव—इति गोयीचन्द्रः । यत्र अजन्तपदस्य आदिपदस्य च परस्परमन्वयो न स्यात् तत्रेत्यर्थः ।

(३) नात्र परस्परापेक्षा, वाक्ययो र्भिन्नत्वात्—इति गोयीचन्द्रः ।

(४) अस्य सूत्रस्य वृत्तौ अचीति पाठः बहुषु पुस्तकेषु दृश्यते । संक्षिप्तसारेऽपि "छोऽचः" इत्यस्य वृत्तौ "अच उत्तरश्छकार' स्वरे परे द्विर्भवती' त्युक्तम् ।

अचो ह्राभ्यामरो यपः । अचः पराभ्यां हकाररेफाभ्यां रभिन्नयपो द्विः स्याद्वा । प्रह्नुते प्रह्‌नुते, लेह्मि लेह्‌म्म, सूर्यः सूर्य्यः, शूर्पः शूर्प्पः इत्यादि । अचः किं–संह्नुते । यपः किं–वर्षा । अरग्रहणमुत्तरार्थम् ।

स्वादनचि । स्वात् परोऽरो यपो द्विर्वा स्यात् अनचि । संय्यन्ता संयन्ता, क्लृप्प्यते क्लृप्यते । स्वात् किं–वाय्वोः । अरः किं–धर्म्मः । अनचीति किं–दधि । विरामेऽपि–नक्क् नक्, अज्-भिन्नत्वात् (१) । घादपीति केचित्–वाक्क् वाक् वाग्ग् इत्यादि ।

रात् शस् । रेफात् परः शस् वा द्विः स्यात् अनचि । मर्ष्ष्यते मर्ष्यते । अनचि किं मर्षणम् ।

यल-णप-खप-शसेभ्यो णप यल-शस-खपाः । एभ्यः एते क्रमात् द्वयाः स्युर्वा । उल्क्का उल्का, शुल्क्कः शुल्कः, क्षीरं क्षीरं, स्कन्धः स्कन्ध इत्यादि ।

पुत्रादि-पुत्रपुत्रादिनोस्तोऽनाक्रोशे । पुत्रादिन् इति शब्दस्य पुत्रपुत्रादिन् इति शब्दस्य च तकारस्य द्वि र्वा स्यान्नत्वाक्रोशे । पुत्रान् पुत्रपुत्रान् वा अत्तुं शीलमस्याः सा पुत्त्रादिनी पुत्रादिनी पुत्त्रपुत्त्रादिनी पुत्रपुत्रादिनी, व्याघ्री मत्सी वा । केचित्

अत्र गोयीचन्द्रेण "स्वरे परे इति वृत्तौ प्रमादपाठः, यतो नैतत् पाणिनि सर्व-वर्म्मचन्द्रादिसम्मतम् । एवं सति ह्रीच्छ्यते इत्यादौ द्वित्वं न स्यात्" इत्युक्त्वा स्वरे परे इति निराकृतम् । ह्रीच्छ्यते इति ह्रीछ लज्जे इत्यस्माद्भावे ते ।

कातन्त्रेऽपि 'द्विर्भावं स्वरपरश्छकारः" इति सूत्रे टीकाकारेण "स्वरात् परं इति तत्पुरुषः न पुनः स्वरः परो यस्मादिति बहुव्रीहिः, तेन उच्छ्रतीति न द्विर्भावः, विच्छ्यते इति द्विर्भाव एवे"त्युक्तम् ।

(१) अजभिन्नत्वात् विरामस्येति शेषः ।

६५। झप्झसोः खस्झवौ चप्जवावन्ते च।

(झप्झसोः ६॥, खस्झवोः ७॥, चप्जवौ १॥, अन्ते ७, च।१।)।

झप-झसयोः स्थाने खस-झवयोः परयोः क्रमात् चप-जवौ स्तः, विरामेच। शिवच्छाया, अच्छा।

पुत्रहती पुत्रजग्धी इत्यपि आहुः। अनाक्रोशे किं-पुत्रादिनी पुत्रपुत्रादिनी हयलि भूयाः।

मू-नी-वयः। एते हयाः स्युर्वा। उर+ +केण उरmmपेण उरः: केण पचे उर+केणेत्यादि। परस्परानपेचायामित्यादि शाकटायनमते, ग्रन्यक्षता तु उपेचितं, श्रुतिं प्रति भेदाभावात्।

लोपो वा य-समझसे हसादय-झसस्य। हसात् परस्य यस्य ये झसस्य समझसे लोपः स्यात् वा। आस्ये भवं आस्यं आस्त्यं, हर्य्यते (१) हर्य्यते जर्गीयति जर्ग्गीयति पिण्डि पिण्ड्ढीत्यादि। हसात् किं, भय्यते भेत्ता। झसस्येति किं, शार्ङ्गम्। समेति किं तर्सा।

अभ्र-वभ्र-मभ्रां रो ये। एषां रस्य लोपो वा स्यात् ये। अभ्यते वभ्यते मभ्यते, पचे अभ्रयते इत्यादि।

६५। झप्। झपादयः प्रत्याहाराः। क्रमादिति—

झपः खसे चपादेशो जबादेशो झसो झवे।

विरामे तौ तयोः स्यातामित्यस्यार्थः प्रकीर्त्तितः॥

शिवच्छाया इति शिवस्य छाया इति वाक्यं, छस्य छोऽच

---

(१) हर्य्य क्लमे गतौ इत्यस्य भावे रूपम्।

वि-सन्धिः।

६६। वेः सोऽशसन्ते छते।

(वेः ६।, सः १।, अ-शसन्ते ७।, छते ७।)।

वेः सकारः स्यात् अ-शसन्ते छते परे। कृष्णश्चिन्त्यः, हरिष्टीकते, विष्णुस्त्राता। शसन्ते तु—कः त्सरुः।

६७। से तु क-ख-प-फे वा।

(से ७।, तु ।१।, क-ख प-फे ७', वा ।१।)।

इति द्वित्वेऽनेन पूर्व्वस्य चः। न च्छ्यतीति अच्छा (१) निर्म्मला। चपः खथ् वा शसि। चपस्य खथ् स्याद्वा शसि। टख्श्यामा टक्श्यामा अफ्सराः अप्सराः षठ्सन्तः षट्सन्तः तथ् षष्ठः तत्षष्ठः। शसि किं वाग्हरिः।

इति हस्-सन्धिपादः।

६६। वेः। शस् अन्ते यस्य सः, न शसन्तः अशसन्तस्तस्मिन्। छत् प्रत्याहारः तस्य विशेषणं तेन शसन्तभिन्ने छते इत्यर्थः। कृष्णश्चिन्त्यः इति, अनेन से कृते चवर्गयोगात् शः। एवं हरिष्टीकते इत्यत्र टवर्गयोगात् षः।

६७। सेतु। सः समासस्तस्मिन्। भास्कर इत्यादि, भासं करोति, भासा खरस्तीक्ष्णः, भासां पतिः, भासा फेरुरिति वाक्यम्। परे तु भाःकर इति नेच्छन्ति। अत्राहुः—

---

(१) नञ्पूर्व्वात् छो य लूनौ इत्यस्मात् धातो र्डप्रत्यये स्त्रियां रूपम्।

वेः सकारो वा स्यात् क-ख-प-फेषु परेषु, से सति। भास्करः भाःकरः, भास्खरः भाःखरः, भास्पतिः भाःपतिः, भास्फेरुः भाःफेरुः।

सदा ऽयस्तमसोः काण्डे वास्तोर्व्वाचो दिवःपतौ।
भ्रातुः पुत्रे शुनः कर्णे पिण्डे तु मेदसो मतः।
नमः पुरः क्रियायोगे तिरोऽन्तर्द्धौ पराभवे।
निर्दुराविर्वहिः-प्रादुश्चतुरान्तु कखे पफे।
अव्यासौ ऽपरदस्यस्य पाश-कर्षी-कुशा-कर्णि।
कामि-कंस-कुम्भ-पात्रे, पदे तु स्याच्छिरोऽधसोः।
इसुसः क-ख-प-फेऽथा सेपि वा स्यात् क्रियाश्रये।
द्वियतुस्त्रिश्चकृत्वोर्थेऽथाव्यस्य सश्च वेरपि।
क-काम्य-कल्प-पाशेषु, रस्त्वकाम्येषु वेः सदा।
इकः सः षः क ख प फे वाशब्दस्य व्यवस्थया।

अथ आदे वेंः सः स्यात् काण्डादौ से सति। अयस्काण्डः तमस्काण्डः वास्तोष्पतिः, वर्हिष्ठादित्वात् षः, वाचस्पतिः दिवस्पतिः भ्रातुष्पुत्रः, इकः सः षः क ख प फ इति षः, शुनस्कर्णः, पञ्चम्यः प्या अलुक्। मेदस्पिण्डः। क्रियया सह से नमःपुरसो वेंः सः। नमस्कृत्य नमस्कारः, नमःशब्दस्य साक्षादादित्वात् वा सविधानात् नमः कृत्वेति च।

अन्तर्धानपराभवयोस्तिरसो वेः सः। तिरस्करोति तिरस्कारः तिरस्कृत्य, वा स-विधानात् तिरःकृत्वेति च।

निरादीनां क ख प फे परे वेः सः। निष्कर्षः दुष्करः प्रावि-

ष्कारः वहिष्कृतं प्रादुष्कृत्य चतुष्कपालमित्यादि। सर्व्वत्र इकः सः षः क ख प फ इति सः।

पाशादौ से अनुत्तरदस्थस्य व्यवर्ज्जस्याऽसन्तस्य वेः सः। अयो लौहः पाशो रज्जुः अयस्पाशः, अय इव कर्णावस्या-अयस्कर्णी, स्त्रीलिङ्गनिर्द्देशात् अयःकर्णः अयस्कुशा, आवन्त-निर्द्देशात् अयः-कुशीति। अयः-करोतीति अयस्कारो जाति-विशेषः। तेजः कामयते तेजस्कामः अयस्कामः। ञन्तस्यैव कमो ग्रहणात् अञन्ते माभूत्, तेजः कामः। अयस्कंसः (१) चतुःषष्टिपलात्मकपरिमाणार्थग्रहणात्, अन्यत्र अयःकंसः। अय-स्कुम्भः, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं इत्युक्तेः अयस्कुम्भीति। एवं अयस्पात्रं अयस्पात्रीति। अव्येति किं श्वः कामः। अपरदस्येति किं, धर्म्मंप्रासु कामार्थयशःकरीषु इति भट्टिः।

पदशब्दे परे शिरोऽधसो र्वेः सः से। शिरस्पदं अधस्पदं। से किं शिरःपदे करोति, अधःपदे करोति। अपरदस्थस्यानुवृत्तेः परम-शिरः-पदं परमाधः-पदम्।

इसन्तोसन्तयोः से सति क ख प फे परे वेः सः। सर्पिष्कुण्डं यजुष्पाठः। से किं तिष्ठतु सर्पिः पिबोदकम्। अपरदस्थस्यानु-वृत्तेः परमसर्पिः-कुण्डम्।

अथ क्रियया परस्परापेक्षायां इसन्तोसन्तयोरसेऽपि क ख पफेषु वेः सो वा। सर्पिष्कुरु यजुष्पठ, पक्षे सर्पिः कुरु यजुः-

(१) अयसः कंस इति षष्ठीसमासः।

६८। शसि शस्। (शसि ७।, शस् ।१।)।

वेः शस् वा स्यात् शसि परे। हरिश्शेते हरिःशेते, सन्तप्पट् सन्तःपट्, शिवस्सेव्यः शिवःसेव्यः।

पठ, अथशब्दात् परदस्यस्येति निवृत्तं, तेन परमसर्पिष्कुरु परमयजुष्पठ इत्यपि। क्रियान्वये किं, परमसर्पिः कुण्डम्।

द्विस्त्रिचतुरित्येषां कखपफेषु वेः सो वा स्यात् वारेऽर्थे। द्विष्करोति त्रिष्खादति चतुष्पठति। पक्षे द्विः करोति इत्यादि। वचल्वोऽर्थे किं, चतुष्कपालमिति पूर्व्वेण नित्यम्।

अथानन्तरं व्यवर्जस्य सस्य वेः कादौ नित्यं सः स्यात्। कस्येदमयः अयस्कं, आत्मनः पयइच्छति पयस्काम्यति, पयस्कल्पं, धनुष्पाश इत्यादि। अव्यस्येति किं, अधःकं, स्वःपाशः।

रेफस्य वेः काम्यभिन्ने कादौ सः स्यात्। गीष्कं, गीष्कल्पः, धूष्पाश इत्यादि। काम्येतु गीःकाम्यति। अव्येति किं स्वःकल्पं। अयस्काण्डादेराकृतिगणत्वात्—

आभीक्ष्ण्ये कः कः इत्यर्थे कस्कः, एवं कुतः कुत आगतः कौतस्कुतः। क्विवन्तः सद्यःक्रीस्तत्र भवः क्रतुः साद्यस्क्रः, सद्यस्कारः, मुहुस्कार इत्यन्यः। अयस्काण्डो लौहभेद इत्यादि।

इकः परस्य वेः सस्य षः स्यात्। प्रयोगा यथास्थाने दर्शिताः। (१)

६८। शसि। शस् प्रत्याहारः। हरिश्शेते इति वे क्षते सिद्धे

---

(१) क्वचित् पुस्तके अत्र "चतुष्कपालमित्यादौ वेः से इान्तत्वात् षत्वाभावे इकः सः ष इत्युक्त"मित्यधिकः पाठः।

ष्कारः वहिष्कृतं प्रादुष्कृत्य चतुष्कपालमित्यादि । सर्व्वत्र इकः सः षः क ख प फ इति सः ।

पाशादौ से अनुत्तरदस्थस्य व्यवर्ज्जस्याऽसन्तस्य वेः सः । अयो लौहः पाशो रज्जुः अयस्पाशः, अय इव कर्णावस्या-अयस्कर्णी, स्त्रीलिङ्गनिर्द्देशात् अयःकर्णः अयस्कुशा, आवन्त-निर्द्देशात् अयः-कुशीति । अयः-करोतीति अयस्कारो जाति-विशेषः । तेजः कामयते तेजस्कामः अयस्कामः । ञ्रन्तस्यैव कमो ग्रहणात् अञ्रन्ते माभूत्, तेजः कामः । अयस्कंसः (१) चतुःषष्टिपलात्मकपरिमाणार्थग्रहणात्, अन्यत्र अयःकंसः । अय-स्कुम्भः, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं इत्युक्तेः अयस्कुम्भीति । एवं अयस्पात्रं अयस्पात्रीति । अव्येति किं श्वः कामः । अपरदस्येति किं, धर्म्मग्रासु कामार्थयशःकरीषु इति भट्टिः ।

पदशब्दे परे शिरोऽधसो र्वेः सः से । शिरस्पदं अधस्पदं । से किं शिरःपदे करोति, अधःपदे करोति । अपरदस्थस्यानुवृत्तेः परम-शिरः-पदं परमाधः-पदम् ।

इसन्तोसन्तयोः से सति क ख प फे परे वेः सः । सर्पिष्कुण्डं यजुष्पाठः । से किं तिष्ठतु सर्पिः पिवोदकम् । अपरदस्थस्यानु-वृत्तेः परमसर्पिः-कुण्डम् ।

अथ क्रियया परस्परापेक्षायां इसन्तोसन्तयोरसेऽपि क ख पफेषु वेः सो वा । सर्पिष्कुरु यजुष्पठ, पक्षे सर्पिः कुरु यजुः-

(१) अयसः कंस इति षष्ठीसमासः ।

९८। शसि शस् । (शसि ७।, शस् ।१।) ।

वेः शस् वा स्यात् शसि परे । हरिश्शेते हरिःशेते, सन्तष्षट् सन्तःषट्, शिवस्सेव्यः शिवःसेव्यः ।

षठ, अथशब्दात् परदस्येति निवृत्तं, तेन परमसर्पिष्कुरु परमयजुष्पठ इत्यपि । क्रियान्वये किं, परमसर्पिः कुण्डम् ।

द्विस्त्रिचतुरित्येषां कखपफेषु वेः षो वा स्यात् वारेऽर्थे । द्विष्करोति त्रिष्खादति चतुष्पठति । पक्षे द्विः करोति इत्यादि । चक्रत्वोऽर्थे किं, चतुष्कपालमिति पूर्व्वेण नित्यम् ।

अथानन्तरं ष्यवर्जस्य सस्य वेः कादौ नित्यं सः स्यात् । कस्येदमयः अयस्कं, आत्मनः पयइच्छति पयस्काम्यति, पयस्कल्पं, धनुष्पाश इत्यादि । अष्यस्येति किं, अधःकं, स्वःपाशः ।

रेफस्य वेः काम्यभिन्ने कादौ सः स्यात् । गीष्कं, गीष्कल्पः, धूष्पाश इत्यादि । काम्येतु गीःकाम्यति । अष्येति किं स्वः-कल्पं । अयस्काण्डादेराकृतिगणत्वात्—

आभीक्ष्ण्ये कः कः इत्यर्थे कस्कः, एवं कुतः कुत आगतः कौतस्कुतः । क्विवन्तः सद्यःक्रीस्तत्र भवः क्रतुः साद्यस्क्रः, सद्यस्कारः, मुहुस्कार इत्यन्यः । अयस्काण्डो लौहभेद इत्यादि ।

इकः परस्य वेः सस्य षः स्यात् । प्रयोगा यथास्थानि दर्शिताः । (१)

९८ । शसि । शस् प्रत्याहारः । हरिश्शेते इति से कृते सिद्धे

---

(१) क्वचित् पुस्तके अत्र "चतुष्कपालमित्यादौ वेः से टान्तत्वात् षत्वाभावे इकः सः ष इत्युक्त"मित्यधिकः पाठः ।

६९ । कख-पफयो र्मून्यौ ।

(कख-पफयोः ७॥, मून्यौ १॥) ।

वेर्मून्यौ क्रमात् वा स्यातां कख-पफयोः परयोः ।

हरि+काम्यः हरिः काम्यः, मणि+खनिः मणिः खनिः, कृष्णmपाता कृष्णः पाता, भक्तिmफलति भक्तिः फलति ।

७० । अतोऽह्वव्युः । (अतः ५।, अत्-ह्वबि ७।, उः १।) ।

अकारात् परस्य वेरुकारः स्यात् अकारे ह्वबि च परे ।

शिवोऽर्च्यः, शिवोवन्द्यः ।

सन्तष्षट् इत्यादौ अषीतिवर्ज्जनात् षत्वार्थं शस्विधानमिति, तेन श-ष-से श-ष-साः स्युरित्यर्थः । खपान्ते शसि लुब्वा । खपान्ते शसि परे वे लुप् वा स्यात् । कश्च्योतति कष्ठीवति कस्तौति । पक्षे कः श्च्योतति इत्यादि ।

६९ । कख । कश्च खश्च तत्, पश्च फश्च तत्, पश्चात् कखञ्च पफञ्च ते तयोः । मण्डूकगत्या अशसन्त इत्यनुवर्त्तते, तेन वासः क्षौमं, कः प्साति इत्यादौ मून्यौ न स्यातां । वाशब्दस्य व्यवस्था-वाचित्वात् ख्याधौ न स्यात्, तेन शिवःख्यात इत्यादि ।

७० । अतः । ह्वब् प्रत्याहारः परबकारेण । ञपोऽक् समो र्णौ ऋटक्चेति ज्ञापकात् सूत्रनिर्द्देशाच्च (१) शिवोऽर्च्य इति वेरुत्वे अता सहादौ एः, पश्चादकारलोपः ; अन्यथा उकारस्य वः स्यात् (२) ।

---

(१) सूत्रनिर्द्देशात् अतोऽह्वव्युरिति सूत्रे अतोऽत् इति निर्द्देशात् ।

(२) अत्र अशसन्त इत्यस्यानुवृत्ति र्नास्ति, अनिष्टत्वात्, तेन रामोऽस्नातीति स्यादेवेति दुर्गादासः ।

७१। अ-भो-भगोऽघोभ्योऽवे लुप्।

(अ भो भगोऽघोभ्यः ५।॥, अवे ७।, लुप् ।१।)।

अवर्णात् भो भगो अघोभ्यश्च परस्य वेर्लुप् स्यात् अवे परे। रुद्रा नमस्याः, भो हरे, भगो रच, अघो यज।

७२। य वाचि। (य ।१।, वा ।१।, अचि ७।)।

अवर्णात् भो भगो अघोभ्यश्च परस्य वे र्यो वा स्यादचि परे। शिवयुग्रः शिवउग्रः भोयच्युत भो अच्युत।

७१। अभो। भो भगो अघो इति सम्बोधनस्यैकदेशानुकरणम् (१)। परसूत्रसापेक्षत्वात् इहाचि नोदाहृतम्। अवप्रत्याहारः परवकारेण इत्याह रुद्रा नमस्या इति। नमस्या इति नमःशब्दात् नमस्तपोवरिव इत्यादिना क्यः, नमस्यः, तस्य धुसंज्ञा, ततस्तव्यानीयया इति टे यः, पश्चादसाल्लोप इत्यकारलोपे, लोपो वा य-समभसे हसात् य-समभसस्येति वा यलोपः, ततो लिङ्गसंज्ञायां स्याद्युत्पत्तिः।

७२। यवा। शिव उग्रइति वेर्लुपि न सन्धिः। यइत्यस्य ईषत्स्पृष्टता सिद्धैव, ईषत्स्पृष्टतरो योऽनेन विधीयते। वाशब्दस्य व्यवस्थावाचित्वात् अवर्णादचि य्वौ दान्तौ वा लघुप्रयत्नतरावपि स्यातां, तेन तयार्थ्याः तयार्थ्याः, लुप्पक्षे त आर्थ्याः। पटवेहि पटवेहि पटएहि। लघुप्रयत्नता हि उच्चारणस्थानशैथिल्यम् (२)।

---

(१) भोः भगोः अघोरित्येषां विसर्गं विहायेत्यर्थः।

(२) शैथिल्यं मन्दप्रयत्नता।

७३ । रिचो ऽवे । (र ।१।, इचः ५।, अवे ७।) ।

इचः परस्य वे रेफः स्यादवे परे । हरिरयं, चतुर्भुजः ।

७४ । रोऽचः । (रः ६।, अचः ५।) ।

अचः परस्य रेफस्य वे रेफः स्यादवे परे । त्वातरव, धातर्गच्छ ।

७५ । खपि वा । (खपि ७।, वा ।१।) ।

अचः परस्य रेफस्य वे रेफः स्याद्वा खपि परे । गीर्पतिः गीष्पतिः गीःपतिः ।

एवं उञि आत् न यः (१) तेन देवदत्ता उ एकविंशतिः, देवदत्त उ एकः, अत्र नित्यं वेर्लुप् ।

७३ । रिचः । र इति लुप्तप्रोक्तं दं । स्वरूपभङ्गनिरासाय अनुकरणत्वाद् वा न विः, इच् प्रत्याहारस्तस्मात् । अत्रापि अव-प्रत्याहारः परवकारेण इत्याह चतुर्भुज इति, चत्वारो भुजा यस्य इति वाक्यम् । (२)

७४ । रो । र इति प्रोक्तान्तं दं । आद्र इति कृते सिद्धे अज् ग्रहणं परार्थम् । (३)

७५ । खपि । खप् प्रत्याहारः । मण्डूकगत्या से तु कखपफे वेत्यतः स इत्यनुवर्त्तते, तेन इयं गीः पतिरसावित्यादौ न स्यात् ।

---

(१) उञि परे अवर्णात् परस्य वेर्यो न स्यात् ।

(२) चतुर्भुज इति सामान्यविशेषन्यायेन परसूत्रस्योदाहरणं भवितुमुचितमिति नाशङ्कनीयं, कार्य्यिगतविशेषापेक्षया तत्पूर्व्वनिमित्तगतविशेषस्यान्तरङ्गतया बलवत्त्वादिति केचित् ।

(३) परसूत्रे अचोऽनुवृत्तिं विना अहर्पतिरित्याद्यसिद्धेरित्यर्थः ।

गीर्पतिरिति गिरां पतिरिति वाक्यम्। गीष्पतिरिति अय-स्काण्डादेराकृतिगणत्वात् से तु कखपफे वेति वेः से, इकः सः षः इति षः। उभयत्यक्तपक्षे (१) गीःपतिः गीर्वाण इत्यादि। एवं अहर्पति अहस्पतिः अह*m*पतिः अहःपतिः, धूर्पतिः धूष्पतिः धू*m*पतिः धूःपति। यद्यपि सामान्येनोक्तं तथाप्यभिधानात् ज्ञेयम् (२)।

एकाधिकरणे प्रचेतसो राजसे। प्रचेतसो वेः रेफः स्यात् वा एकाधिकरणे राजन्निति शब्दे परे न तु से। हे प्रचेता राजन् हे प्रचेतो राजन्। एकाधिकरणे किं जुहुधि प्रचेतो राजन् गच्छ। से तु प्रचेतोराजन् भोः (३)। नान्तग्रहणात् शतन्ते (४) प्रचेतो राजन् गच्छ।

---

(१) अपि वेति से तु कखेष्वुभयोरप्राप्तिपक्षे इत्यर्थः।

(२) एतेन गिर् धुर् अहन् एषामेव विसर्गस्य पतिशब्दे परे एव स्यादिति ज्ञापितम्। अतएव वाग्मी पतिः गीःपाठ इत्यादौ न स्यादिति दुर्गादासः। गीष्पतिरित्यत्र "इदं निपात्यमित्यन्ये" इत्यधिकः पाठः। संक्षिप्तसारे तु सन्धिपादे १६१ संख्यक सूत्रे गीष्पतिरित्यसाधुरित्युक्तम्।

अमरटीकायां गीष्पतिशब्दे तु "गिरां पतिः षत्वे च कस्कादित्वात साधु"रिति रघुनाथः। भरतस्तु "गिरां पतिः गीष्पतिः सेत्व कखपफेवेति षः, मनीषादित्वात् षत्वं; षाभावपक्षे कखपफयोर्मूर्ध्वाविति उपाध्मानीये गी*m*पतिरिति; तदभाव-पक्षे अपि वेति रेफे गीर्पतिः; तदभावपक्षे विसर्गस्य स्थितिरेव, गीःपतिरिति। एवं पातञ्जल्यं चन्द्र-क्षीरस्वामि-वोपदेव-शुभूत्यादीनां सम्मतमेव। अतएव गीष्पति-रित्यसाधुरिति कस्यचिद्वचनं न हृद्य"मित्याह।

(३) प्रचेता राजा यस्येति विग्रहः।

(४) शतृप्रत्ययान्ते राजधातौ परे न इत्यर्थः।

७६। **नाह्नो रकत्तौ।** (न।१।, अह्नः ६।, रकत्तौ ७।)

अह्नो रेफस्य वे रेफो न स्यात् रेफे के त्तौ च परे।

अहोरात्र: अहस्कर:, अहोभि:।

७७। **हस्येतत्तदोऽनञकः से लोपः।**

(हसि ७।, एतत्तदः ५।, अनञकः ५।, सेः ६।, लोपः १।)।

नञक्वर्जादेतदस्तदश्च परस्य से र्वे लोपः स्यात् हसि परे।

एष कृष्णः, स विष्णुः। अनञकः किम्—असः शिवः, एषको रुद्रः।

७६। नाह्नः। रश्च कश्च त्तिश्च तत्तस्मिन्, सौत्रत्वान्नुण्। अत्र सामान्यशब्दस्य विशेषपरत्वात् रात्रिरूपरथन्तराणां (१) रेफेष्वेव, तेनाहारजनीत्यादौ निषेधो न स्यात्। अहोरात्र इति एकदेशविकृतमनन्यवद्भवतीति न्यायादिति परे। चन्द्रस्तु रेफमात्रे निषेधात् अहोरजनी अहोरमणीयमित्याह, अत उक्तं रेफइति (२)। हे सिलोपे च। अह्नः सिलोपे वेः रेफो न हे। दीर्घाहो ग्रीष्मः ह्रस्वाहो हेमन्त इत्यादि। हे किं अत्यहर्हेमन्तः। लोपग्रहणात् लुकि माभूत्—दीर्घाहर्वनम्।

७७। एष च स च तत्तस्मात्, नञ् च अक् च तौ, तौ न विद्येते यस्य तत्तस्मात्। सेः किं एतैस्तै र्गम्यते।

---

(१) रथन्तरं साम।

(२) सत्यहोरात्र इति ज्ञापकादाचार्य्येण चन्द्रमतमेवावलम्बितमिति युक्तमुत्पश्याम इति।

७८ । ढ्रोढ्रि र्घेथानुः ।

(ढ्रः ६।, ढ्रि ७।, र्घः १।, च ।१।, (अन्-ऋ) = अनुः ६।) ।

ढकारस्य ढकारे परे, रेफस्य रेफे परे, लोपः स्यात्, पूर्व्वस्य च ऋवर्जस्य र्घः । रूढ़ः, हरीरम्यः । अनुः किं—वृढ़ः ।

इति वि-सन्धिपादः ।

इति सन्ध्यध्यायः ।

एपे च पादपूरणे । आभ्यां सेर्वे लोपः स्यात् पादपूरणे कर्त्तव्ये, एप इति प्रौक्रान्ते परे । यथा—

सैप दाशरथी रामः सैप राजा युधिष्ठिरः ।

एपैप (१) रथमारुह्य मथुरां याति माधवः ॥

पादपूरण इति किं, स एप चिणोति, स एप पृथिवीपालः पालयामास मेदिनीमिति । एपेति किं, स एव श्रीहरिः पाया-द्देवक्यानन्दवर्द्धनः ।

७८ । ढ्रो । ढच रच तत्तस्य, न ऋट अनृ तस्य । रूढ़ इति रुहौ जन्यां क्त, होढ़, ढभात्तस्य धः, ष्टुभिरिति धस्य ढः, अनेन लोपर्घौ । वृढ़ इति वृहधू हिंसे, क्त, जदित्त्वादिमो-ऽभावे साधनं पूर्व्ववत् । वि-सन्धिपादः (२) । सन्ध्यध्याय इति—एकार्थावच्छिन्नः पादसमूहोऽध्यायः ॥

---

(१) एपैप इति माधवविशेषणम्, सम्भ्रमे द्वित्वम् ।

(२) अत्र कश्चित् पुस्तके श्लोकोऽयं दृश्यते—

२यः । अजन्ताध्यायः ।

संज्ञा ।

७९ । लेः—सि औ जस्, अम् औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् । (लेः ५।, सि—सुप् ।१।।।) ।

स्यादीन्येकविंशतिर्लेः पराणि प्रयुज्यन्ते । ज श ट ङ पाः सि-ङस्योरिकारश्चेतः ।

८० । त्रिशः प्री द्वी ची ची पी षी प्राः ।

(त्रिशः ।१।।।, प्री—स्यः १।।।) ।

स्यादीनि त्रीणि त्रीणि क्रमात् प्री द्वी त्री ची पी षी स्री-संज्ञानि स्युः ।

---

७९ । लेः । स्यादीनामेकविंशतिः प्रत्येकं दं, सीत्वात् सेर्लुक् । ज श ट ङ पानां सि-ङस्योरिकारस्य चेत्त्वं चिह्नार्थम् । अनिर्द्दिष्टार्थत्वात् स्वार्थे भवन्ति स्यादय इति । त्यर्थसम्बुद्ध्युक्तार्थे प्रीत्यादिना अर्थनियमः कार्य्यः, अनेन तु स्यादीन्येव विधीयन्ते, अतो नायं व्यर्थः ।

८० । त्रिशः । त्रीणि त्रीणि त्रिशः वीप्सार्थे चशस् । प्रश-

श्रीमद्बोपदेववचसा सर्व्वार्थसम्पादिना
सन्ध्यध्याय एव विदितस्तस्यामला टिप्पनी ।
संसार्य्यात्मजातहृदयान्तर्ध्वान्तसन्तापिनी
श्रीरामेण पाणिनिमते ज्ञानाय सन्तन्यते ॥

८१। सम्बुद्धौ सि घिः।

(सम्बुद्धौ ७।, सिः १।, घिः १।)।

सम्बोधने विहितः सि घिसंज्ञः स्यात्।

८२। स्यमौजस् घिः।

(सि अम् औ जस् ।१।।।, घिः १।)

सि अम् औ जस् एते घिसंज्ञाः स्युः।

दीनां च-सः प्रीचेत्यादि। परे तु प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमीत्याहुः। ग्रन्थकृन्मते प्रादेर्नदादिपाठादीप्। अतएवाग्रे सदाऽनूक्तेऽसादिप्रथाः, क्रियान्तःकालाध्वनीय पीच इति स्त्रीलिङ्गनिर्देशः कृतः।

८१। सम्बुद्धौ। सम्बुद्धिः सम्बोधनं, चेतनाचेतनयोः स्थितयोराभिमुख्येऽभिधानं, तत्र विहितस्य सेरेव घिसंज्ञेत्यर्थः। एके तु वैकल्यादिना अचेतनस्यापीत्याहुः। सम्बुद्धिरिति परे।

८२। स्यमौ। सिश्च अम्च औश्च जश्च तत्। प्रथमौघिरितिकृते सिद्धे स्यमौजस् इति कृतं, मुख्यलाक्षणिकयोर्मध्ये मुख्ये कार्य्यसंप्रत्यय इति परिभाषाज्ञापनार्थम्, तेन सख्यावित्यत्र घौत्रिरिति न त्रिः स्यात् (१)। अम्जसोर्मध्ये पाठात् औकारद्वयस्य ग्रहणम्, अन्यथा व्युत्क्रमनिर्देशो व्यर्थः स्यात्। सर्व्वनामस्थानमिति परे।

---

(१) स्यादिपठितस्यैव औकारस्य घिसंज्ञा, तस्य मुख्यत्वात्; न तु यस्य कस्यचित् स्थाने जातस्य, तस्य लाक्षणिकत्वात् इत्याशयः।

८३ ।　शिः क्लीवे । (शिः १।, क्लीवे ७।) ।

नपुंसके शिरेव घि-संज्ञः स्यात् ।

८४ ।　दान्तवत् सभि । (दान्तवत् ।१।, सभि ७।) ।

सभयोः परयो दान्तवत् कार्य्यं स्यात् ।

८५ ।　भौ लिध्वो र्हसभसोरन्ते च ।

(भौ ७।, लिध्वोः ६॥, हसभसोः ७॥, अन्ते ७।, च ।१।) ।

भौ परे यत् कार्य्यं वच्यते त-ल्लेर्हसे धोर्भसे स्यात्, अन्ते चतयोः ।

---

८३ । शिः क्ली । शिरेवेति एवकारेण शिभिन्ना व्यवच्छिद्यन्ते, तेन वारिणी इत्यादौ नसव्मह्न इति न घः ।

८४ ।　दान्तवत् । अधिकारात् स्यादेरेव सभयोर्दान्तत्वातिदेशः, तेन पुम्भ्यां पुंभ्यामित्यादौ वा यम्, न तु रंस्यते मंस्यते इत्यादौ मनो र्नुनिषेधः ।

८५ । भौलिध्वोः । लेर्हसन्तं धोर्भसन्तं भिरित्यर्थः । लिधुभ्यां भसन्तं भिरिति कृते सिद्धे एतत्करणं, लेर्दान्ते धोर्दान्तादान्तयोर्भिकार्य्यज्ञापनार्थं, तेन कस्नाता शक्स्नाता इत्यादौ न स्यादेरिति सकयोर्लोपः । अभ्राक्षीत्, आक्षीत्, अवोढ़ अवट्, अवक्, अधीक् इत्यादौ सकलोप-ढ-षड्-कड्-घाः स्युः । (१)

---

(१) कस्नाता इत्यत्र स त र इति त्रिभि र्हसैः संयोगः, तेषु रेफो भिः, तस्मिन् परे स्त् इति संयोगस्य दान्तत्वाभावात् स्यादेः सोलोप इति न सलोपः । एवं शक् स्नाता इत्यत्रापि न कलोपः । अभ्राक्षीत्, आक्षीत्, अवोढ़ एषु अदान्तत्वेऽपि

८६ । हसोऽन्तः फः । (हसः १।, अन्तः १।, फः १।)।

हसो विरामश्च फसंज्ञः स्यात् ।

८७ । सर्व्व विश्व उभ उभय भवत् त्वत् त्वैक सम सिम नेमाः, अन्यान्यतरेतर डतर डतमाः, त्यद् तद् यद् एतदिदमदः किम् इस्माद् युष्मदः, पूर्व्वपरावर दक्षिणोत्तरापराधरान्तरस्वाः स्विः ।

(सर्व्व—नेमाः १।।।, अन्य—डतमाः १।।।, त्यद्—युष्मदः १।।।, पूर्व्व—स्वाः १।।।, स्विः १।) ।

---

८६ । हसो । अन्तः परे वर्णाभावः । स च त्रिविधः—प्रागभावः प्रध्वंसोऽत्यन्ताभावश्च । इह तु प्रध्वंसात्यन्ताभावयोर्ग्रहणम् । तेन अरुणः पयः रामः इत्यादौ स्नोर्विः । हस इति दभेदः स्यादिहस-ज्ञापनार्थः, तेन अस्मीत्यादौ न विः, वष्टि इत्यादौ न डः (१) । नोऽन्तः फः इति कृते दान्तातिदेशात् (२) पयोभ्यां राजभ्यां पुंभ्यां पञ्चानां इति सिद्धे हस्ग्रहणं, मुख्यलाक्षणिकयोर्मध्ये मुख्ये कार्य्यसंप्रत्यय इत्यस्यानित्यत्व-ज्ञापनार्थं, तेन राजतः ।

यथाक्रमं सकलोपः हश्च ढश्च । अवट्, अवक्, अधोक् एषु दान्तत्वेऽपि भौ परे पड्कङ घाः भवन्तीति ।

(१) "हस इह स्यादेरेव, धोर्मो नः फश्चेत्यत्र फग्रहणेनैवेदसिद्धौ भवयोः पृथग्ग्रहणा"दिति दुर्गादासः ।

(२) सभयोः परयोरिति शेषः ।

दभेदो गणभेदार्थः। एते पञ्चत्रिंशत् शब्दाः स्त्रिसंज्ञाः स्युः।

समो ऽतुल्ये, व्यवस्थायां पूर्व्वाद्यो ऽवान्तरो ऽपुरि।
वहिर्योगोपसंव्याने, स्वस्त्वज्ञातिधनाभिधः॥

८७। सर्व्व। सर्व्वस्य विश्वस्येति च-सः (१)। त्वत्-त्वौ अन्यार्थ-वाचकौ। परे तु त्वच्छब्दं नाहुः (२)। डतर–डतमौ त्यौ, येन विधिस्तदन्तस्येति न्यायात् तदन्तानां ग्रहणम्। पृथगन्यतरस्य ग्रहणात् अन्यतमस्य न स्त्रिसंज्ञा, तेन अन्यतमाः अन्यतमायेत्यादि। भाष्ये तु अन्यतमस्यापि स्त्रिसंज्ञाविधानात् अन्यतमे अन्यतमस्मिन्निति। उभ-भवत्वतां स्त्रिसंज्ञाफलं(३)––उभयोः स्त्रियोर्धनं उभधनं, भवत्या धनं भवद्धनं, त्वतेत्यादि।

समोऽतुल्ये इत्यादि। समं सर्व्वसमानयोरित्यमरः। सम-

---

(१) सिद्धान्तकौमुद्यां "आमि सर्व्वनाम्न ह्रट्" (७।१।५२) इति सूत्रस्य वृत्तौ उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्त इत्युक्तम्। गोयीचन्द्रोऽपि सुवन्तपादे २८३ संख्यक-सूत्रटीकायाम् "एकवचनबहुवचनविषयस्तु उभयशब्द" इत्याह। क्रमदीश्वरेण सुवन्तपादे "पूर्व्वाद्युभयौ जसि वा" (२८७) इति सूत्रयित्वा उभयशब्दस्य जसि वा स्त्रिसंज्ञेत्युक्तम्। "उभया अमिता इति तु छान्दसत्वाद्बोध्य"मिति तत्त्वबोधिनी। सिम- सर्व्वार्थः, नेम इत्यर्द्धे।

(२) तत्त्वबोधिन्यान्तु "जयदेवोऽपि प्रायुङ्क्त—त्वदधरमधुरमधूनि पिबन्तमिति, त्वत्तोऽन्यस्या अधर इति विग्रहो न तु तवाधर इति * * * पूर्व्ववाक्येन सहानन्वयापत्ते"रित्युक्तम्।

(३) स्वेस्तु सर्व्वा इत्यनेन उभशब्दात् सर्व्वा विभक्ताय स्युरित्यपि फलम्। तथाच "उभौ हेतू उभाभ्यां हेतुभ्याम् उभयोर्हेत्वोरिति अन्यथा षष्ठी हेतुप्रयोगे इति षष्ठ्येव स्या"दिति कातन्त्रे चतुष्टयवृत्ति २१ संख्यकसूत्रे पञ्जीकारः।

शब्दस्य सकलार्थे वर्त्तमानस्य स्विसंज्ञा न तु समानार्थे। अग्रे प्रयोगं वक्ष्यति नमः समस्मादिति।

व्यवस्थायां पूर्व्वादय इति। दिग्देशकालवाचिता व्यवस्था, तस्यां पूर्व्वादयो नव स्विसंज्ञकाः, यदुक्तं—

पूर्व्वादयो व्यवस्थायां स्युः सर्व्वनामसंज्ञकाः।
व्यवस्था कथिता लोके दिग्देशकालवाचिता॥ इति।

अन्यत्र दक्षिणाः प्रगायकाः प्रवीणा इत्यर्थः। उत्तराः कुरवः, पराः लोकाः श्रेष्ठा इत्यर्थः, अवराः कनिष्ठा इत्यादौ न गौणाख्या चेति न निषेधः (१)। एके तु स्वाभिधेयापेक्ष्यावधिनियमो व्यवस्था; अवधिर्मर्य्यादा सीमेति यावत्; तथाच स्वाभिधेयानां दिग्देशकालानां अपेक्ष्यः कारणत्वेनापेक्षणीयो योऽवधिनियमः स एव इत्याहुः।

अवान्तर इति। अत्र पूर्व्वादौ, न पूरपूस्तस्यां, वह्निर्योगो वहिःसम्बन्धः वाह्य इति यावत्, उपसंवीयते अपिधीयते यत् तत् उपसंव्यानम्. ढेऽनट्, वह्निर्योगिभिन्नं वस्तु केनचिदाच्छादित-मेवोच्यते (२)। तथाच वह्निर्योगोपसंव्यानयोर्वर्त्तमानोऽन्तरशब्दः पूर्भिन्नविषयः स्विसंज्ञ इत्यर्थः। अन्यत्र ब्रह्मशिवयोरन्तरे विष्णुः मध्ये इत्यर्थः।

---

(१) किन्तु व्यवस्थावाचित्वाभावान्निषेध इत्यर्थः।

(२) केनचित्—वस्त्रान्तरेणेत्यर्थः। वस्त्रान्तरेणाच्छादितमधोवास उपसंव्यान-मिति यावत्। उक्तञ्च संक्षिप्तसारे सुबन्तपादे २८६ संख्यकसूत्रे "अन्तरे शाटका परिधानीया इत्यर्थ." इति।

दभेदो गणभेदार्थः। एते पञ्चत्रिंशत् शब्दाः स्त्रिसंज्ञाः स्युः।

समो ऽतुल्ये, व्यवस्थायां पूर्व्वाद्यो ऽवान्तरो ऽपुरि।
वहिर्योगोपसंव्याने, स्वस्त्वज्ञातिधनाभिधः॥

८७। सर्व्वे। सर्व्वश्च विश्वश्चेति च-सः (१)। त्वत्-त्वौ अन्यार्थवाचकौ। परे तु त्वच्छब्दं नाहुः (२)। डतर-डतमौ त्यौ, येन विधिस्तदन्तस्येति न्यायात् तदन्तानां ग्रहणम्। पृथगन्यतरस्य ग्रहणात् अन्यतमस्य न स्त्रिसंज्ञा, तेन अन्यतमाः अन्यतमायेत्यादि। भाष्ये तु अन्यतमस्यापि स्त्रिसंज्ञाविधानात् अन्यतमे अन्यतमस्मिन्निति। उभ-भवत्त्वतां स्त्रिसंज्ञाफलं(३)--उभयोः स्त्रियोर्धनं उभधनं, भवत्या धनं भवद्धनं, त्वतेत्यादि।

समोऽतुल्ये इत्यादि। समं सर्व्वसमानयोरित्यमरः। सम-

---

(१) सिद्धान्तकौमुद्यां "आमि सर्व्वनाम्न सुट्" (७।१।५२) इति सूत्रस्य वृत्तौ उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्त इत्युक्तम्। गोयीचन्द्रोऽपि सुवन्तपादे १९३ संख्यक-सूत्रटीकायाम् "एकवचनबहुवचनविषयस्तु उभयशब्द" इत्याह। क्रमदीश्वरेण सुवन्तपादे "पूर्व्वाद्युभयौ जसि वा" (१९७) इति सूत्रयित्वा उभयशब्दस्य जसि वा स्त्रिसंज्ञेत्युक्तम्। "उभया अमिता इति तु छान्दसत्वाद्बोध्य"मिति तत्त्वबोधिनी। सिमः सर्व्वार्थः, नेम इत्यर्द्धे।

(२) तत्त्वबोधिन्यान्तु "जयदेवोऽपि प्रायुङ्क्त—त्वदधरमधुरमधूनि पिबन्तमिति, त्वत्तोऽन्यस्या अधर इति विग्रहो न तु तवाधर इति * * * पूर्व्ववाक्येन सहानन्वयापत्ते"रित्युक्तम्।

(३) स्त्रेस्तु सर्व्वा इत्यनेन उभशब्दात् सर्व्वा विभक्तय स्युरित्यपि फलम्। तथाच "उभौ हेतू उभाभ्यां हेतुभ्याम् उभयोर्हेत्वोरिति. अन्यथा षष्ठी हेतुप्रयोगे इति षष्ठेव स्या"दिति कातन्त्रे चतुष्टयवृत्ति २८ संख्यकसूत्रे पञ्जीकारः।

शब्दस्य सकलार्थे वर्त्तमानस्य स्विसंज्ञा न तु समानार्थे। अग्रे प्रयोगं वक्ष्यति नमः समस्मादिति।

व्यवस्थायां पूर्व्वाद्य इति। दिग्देशकालवाचिता व्यवस्था, तस्यां पूर्व्वादयो नव स्विसंज्ञकाः, यदुक्तं—

पूर्व्वादयो व्यवस्थायां स्युः सर्व्वनामसंज्ञकाः।
व्यवस्था कथिता लोके दिग्देशकालवाचिता॥ इति।

अन्यत्र दक्षिणाः प्रगाथकाः प्रवीणा इत्यर्थः। उत्तराः कुरवः, पराः लोकाः श्रेष्ठा इत्यर्थः, अवराः कनिष्ठा इत्यादौ न गौणाख्या चेति न निषेधः (१)। एके तु स्वाभिधेयापेक्ष्यावधिनियमो व्यवस्था; अवधिर्मर्य्यादा सीमेति यावत्; तथाच स्वाभिधेयानां दिग्देशकालानां अपेक्ष्यः कारणत्वेनापेक्षणीयो योऽवधिनियमः स एव इत्याहुः।

अवान्तर इति। अत्र पूर्व्वादौ, न पूरपूस्त्स्यां, बहिर्योगो बहिःसम्बन्धः बाह्य इति यावत्, उपसंवीयते अपिधीयते यत् तत् उपसंव्यानम्. ढेऽनट्, बहिर्योगिभिन्नं वस्तु केनचिदाच्छादितमेवोच्यते (२)। तथाच बहिर्योगोपसंव्यानयोर्वर्त्तमानोऽन्तरशब्दः पूर्भिन्नविषयः स्विसंज्ञ इत्यर्थः। अन्यत्र ब्रह्मशिवयोरन्तरे विष्णुः मध्ये इत्यर्थः।

---

(१) किन्तु व्यवस्थाभावात्सामान्यनिषेध इत्यर्थः।

(२) केनचित्—वस्त्रान्तरेणेत्यर्थः। वस्त्रान्तरेणाच्छादितमधोवास उपसंव्यानमिति यावत्। उक्तञ्च संक्षिप्तसारे शब्दपादे २८६ संख्यकसूत्रे "अन्तरे शाटका शुभपरिधानीया इत्यर्थः" इति।

९४। **लुकि न तत्र।** (लुकि ७।, न ।१।, तत्र ७।)।

लुगिति लोपे कृते यो लुप्तस्तस्मिन् परे यत् कार्य्यं तन्न स्यात्

९५। **स्वरादि-नि-चित्त्यं व्यम्।**

स्वरादि-नि-चित्त्यं १।, व्यं १।)।

स्वरादिर्गणो निश्चकारेतस्त्याश्च व्यसंज्ञाः स्युः।

तत्रैकस्यैवान्त्याचो व्यपदेशिवदेकस्मिन् इति न्यायात् (१) देशिवद्भावेन टित्वं, तेन हरौ शम्भौ इत्यादौ इकारादेर्लोपः।

९४। लुकि। लुञ्चधोः क्विप्, न्यङ्क्वादित्वात् (२) कङ्, लुक् पुंलिङ्गः। तत्रेति निमित्तसप्तमी, तथाच—लुक् शब्देन यस्य लोपः क्रियते तन्निमित्तकपूर्व्वकार्य्यं न स्यादित्यर्थः।

९५। स्वरादि। स्वरादिर्यस्य सः, च इट् यस्य चित्, चिच्चा सौ त्यश्चेति चित्त्यः पश्चात् चसः। स्वरादिर्यथा—

स्वर्नक्तं समया वृथा व निकषा सामि स्वयं निःषमं
स्वस्ति प्रादुरतीव भोरिव सना प्रायः शनैर्दुःषमम्।
कं कामं ननु शं दिवा किल तिरोमिथ्या मिथः श्वः पुनः
सायं नाम चिरं चिरेण सहसा दोषा विनोषा वहिः

---

(१) अस्य व्याख्या २८ श पत्रे (४) संख्यक टिप्पन्यां द्रष्टव्या।

(२) न्यङ्करित्यत्र निपूर्व्वादञ्चधातोरुप्रत्यये यथा चस्य क तथात्रापीत्यर्थः। तथाच पाणिनीये "न्यङ्क्वादीनाञ्च" (७। ३। ५३) कुत्वं स्यादित्युक्तम्। तर्कवागीशेनापि चजोः कगोरिति सूत्रटीकायां "न्यङ्क्वादीनाञ्च। एषां चजोः कगौ स्त" इति वार्त्तिकसूत्रं कृतम्। गोयीचन्द्रेण तु सुवन्तपादे प्रथमसूत्रटीकायां "लुगित्यव्युत्पन्नं नाम न तु लुञ्चतेः क्विबन्तस्य रूपमि"त्युक्तम्।